---

६२. निज IV.
६३. परा IV; अपरा परा XI.
६४. कुण्डलिनी I, II, IV, XI, XIII; कुंडलि III; कुंडली V .
६५. आसु I-II, IV, XI, XIII; तानु VIII.
६६. पंचदश IV.
६७. शक्तयश्चक्रमेणोत्था IV; शक्तिचक्रक्रमेणोत्था V-VI, X, XII; शक्तिचक्रे क्रमेणोत्था VII; शक्तिचक्रक्रमेणाथ VIII; शक्तिचक्र क्रमेणोत्थो IX.
६८. जात VI.
६९. 'इति' अधिकपाठ.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The sakti in nature is five-fold- nijā, parā, aparā, sūkṣmā, and kuṇḍalī; and the parapiṇḍa the śiva is the creative outcome of circular sequentiality of śakti.

Notes : śakticakrakrameṇa - Circular sequentiality: According to Indian tradition the creation of the universe is not in a linear direction but in a circular direction - sṛṣṭi, sthitī and laya i.e. creation, maintenance and dissolution to look after which even Brahma, Viṣṇu and Mahesa are assigned with the responsibility. From yogic point of view it will be pertinent to ask a question as to what will be the relevance of such a view to the attainment of the summum bonum i.e. liberation.

अपरम्परं[७०] परमंपदं[७१] शून्यं[७२] निरञ्जनं परमात्मा[७३] इति[७४]।
अपरंपरात्[७५] स्फुरतामात्रमु[७६]त्पन्नम्[७७]
परमपदा[७८]त्भावनामात्रमु[७९]त्पन्नम्[८०]।

---

७०. अपरपरं IV.
७१. परमं पदं VII, X, XII.
७२. श्रून्ये VIII.
७३. अनुपलब्ध IV.
७४. अनुपलब्ध IV.
७५. अपरंपरं V, VII.
७६. स्फुरत्तामात्रम् VI, VIII, X, XII.
७७. पूर्णपद अनुपलब्ध IV.
७८. परमपदं V, VII.
७९. भावनामात्रग् XI.
८०. पूर्णपद अनुपलब्ध IV, VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शून्यात्[८१] सत्तामात्र[८२]मुत्पन्नम्[८३] निरञ्जनात्[८४] साक्षात्कार[८५]मुत्पन्नं परमात्मनः परमात्मा[८६] उत्पन्नः[८७]।।१५।।

aparamparaṃ paraṃpadaṃ śūnyaṃ nirañjanaṃ paramātmā iti |
aparamparāt sphuratāmātramutpannaṃ paramapadāt bhāvanāmātramutpannam |
śūnyāt sattāmātrāmutpannam nirañjanāt sākṣātkāramutpannaṃ paramātmanaḥ paramātmā utpannaḥ ||15||

It is from the cause-less (aparampara) arose the pure vibration itself (sphuratā mātra); from the highest abode (parampada) arose the creative pure feeling (whereas) pure being arose from the non-differentiability; the immediate experience is born out of purity - the blemish-less; and from the absolute soul came the paramātman.

अकलङ्कत्वमनुपमत्व[८८]मपारत्वम् अमूर्त्तत्व[८९]मनुदयत्वमिति पञ्चगुणमपरम्परम्[९०]।।१६।।

---

८१. शून्यं V, VII.

८२. स्वसत्तामात्र V-VI, VIII-X, XII; स्वसत्तामात्रा VII.

८३. पूर्णपद अनुपलब्ध IV.

८४. अनुपलब्ध IV; निरंजनं V, VII.

८५. साक्षात्कारमात्र III, XI; स्वसाक्षात्कर IV; स्वसाक्षात्कार V-VI, VIII-X, XII; स्वसाक्षात्त्कार VII.

८६. परमात्मता IV-V; परमात्मसा VII.

८७. उत्पन्ना IV; उत्पन्न VIII

८८. अनुपलब्ध IV, VII; नुपमतत्वं V.

८९. अमुर्तत्वं IV, VIII; अमूर्तित्वं VII; अमृतत्वम् IX.

९०. पदं VII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

akalaṅkatvamanupamatvamapāratvam
amūrttatvamanudayatvamiti
pañcaguṇamaparaparam||16||

The Causeless (aparamparam) is with five qualities - spotlessness, matchlessness, limitlessness, formlessness, and the unborn-ness.

निष्कलत्वमणुतरत्व[११]मचलत्वम् असङ्ख्यत्व[१२]मनाधारत्व[१३]मिति पञ्चगुणं[१४] परमपदम्[१५] ।।१७।।

niṣkalatvamaṇutaratvamacalatvam
asaṅkhyatvamanādhāratvamiti pañcaguṇaṃ
paramapadam||17||

The parampada is with five qualities - part-less-ness, subtleness, immovableness, innumerability and support-less-ness.

लीनता[१६] पूर्णता उन्मनी[१७] लोलता मूर्च्छता[१८] इति पञ्चगुणं शून्यम् ।।१८।।

līnatā pūrṇatā unmanī lolatā mūrcchatā iti pañcaguṇaṃ
śūnyam ||18||

The śunya is with five qualities - dissolvability, completeness, supramental, fickleness, and swooning.

---

११. नुत्तरत्वं IV; ..णुत्तरत्वं VI.

१२. अनुपलब्ध VI; असंख्यंत्वं VII; असंख्यात्वं VIII.

१३. ...पारत्वं IV-VI, VIII, X, XII; ...पारत्त्या VII; नाराध्यत्व XI.

१४. पंचगुणां VII.

१५. परमं पदम् X, XII.

१६. विनता VIII; लीलता X, XII.

१७. उन्मनि I-III.

१८. मूर्छता II-III, V-IX; मर्छिता IV.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यत्वं सहजत्वं समरसत्वं[९९] सावधानत्वं
सर्वगतत्व[१००]मिति पञ्चगुणं निरञ्जनम्[१०१] ।।१९।।

satyatvaṃ sahajatvaṃ samarasatvaṃ sāvadhānatvaṃ
sarvagatatvam iti pañcaguṇaṃ nirañjanam ||19||

The nirañjana is with five qualities - truthful-ness, spontaneous, ability to be one, alertness and all pervasiveness.

अक्षय[१०२]त्वमभेद्यत्व[१०३]मच्छेद्यत्वम्[१०४] अदाह्यत्वम[१०५]विनाशित्वमिति[१०६]
पञ्चगुणः[१०७] परमात्मा[१०८] ।।२०।।

akṣayatvamabhedyatvamacchedyatvam
adāhyatvamavināśitvamiti pañcaguṇaḥ
paramātmā ||20||

The paramatma is with five qualities - imperishability, impenetrability, impierceablity, non - combustible and imperishability.

---

९९. समरत्वं VIII.
१००. सर्वगत्व IV, X, XII-XIII; सर्वगुणतत्व V.
१०१. निरजनं I.
१०२. अक्षय्य IV-VII, IX-X, XII.
१०३. अभेद्यत्व V.
१०४. अछेद्यत्व IV-X, XII.
१०५. दात्यत्व III; अनुपलब्ध IV; दाह्वत्व VI; दाहत्वं VIII.
१०६. अविनात्वमिति V, VII.
१०७. पंचगुण V; पंचगुणो X, XII.
१०८. परत्मा II; परमात्म IV.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यनाद्यपिण्डस्य[१०९] पञ्चतत्त्व[११०]पञ्चविशंतिगुणाः[१११]

ityanādyapiṇḍasya pañcatatvapañcaviṃśatiguṇāḥ | |

These are the five tattvas and twenty five qualities of the anādyapiṇḍa.

उक्तञ्च -

utkañca

अपरं परं[११२] परमपदं[११३] शून्यं[११४] निरञ्जनं[११५] परमात्मनः[११६]।
पञ्चभिरेतैः सगुणैरनाद्यपिण्डः[११७] समुत्पन्नः[११८]।।२१।।

aparaṃ paraṃ parampadaṃ śūnyaṃ nirañjanaṃ paramātmanaḥ |
pañcabhiretaiḥ saguṇairanādyapiṇḍaḥ samutpannaḥ ||21||

And it is stated also -
Anādyapiṇḍa is evolved from the five principles viz. aparampara, paramapada, śunya, nirañjan and paramātmā and from their qualities.

---

१०९. नादिपिराडस्य XI.

११०. पंचतत्वं III, V-IX; पंचत्वं IV; पंचतत्व VI, X.

१११. ...गुणं III.

११२. पर III.

११३. परमपद III; परमं पदं IV.

११४. शून्य II-III; अथ-अधिक पाठ VIII-IX.

११५. निरंजन III, VI, XI, XIII.

११६. परमात्मान III; परमात्मानः VI-VII; परमात्मानं VIII; परमात्मा IX; परमात्मानौ XI, XIII.

११७. ...नादिपिंडः IV-V, VII-IX.

११८. समुत्पत्रं VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनाद्यात् परमानन्दः। परमानन्दात्[११९] प्रबोधः।
प्रबोधाच्चिदुदयः[१२०]। चिदुदयात्[१२१] प्रकाशः।
प्रकाशात्सोऽ[१२२]हम्भावः।।२२।।

anādyāt paramānandaḥ | paramānandāt prabodhaḥ | prabodhāccidudayaḥ | cidudayāt prakāśaḥ | prakāśātso'hambhāvaḥ ||22||

Supreme bliss from anādya (piṇḍa), from supreme bliss awakening, from awakening arousal of consciousness, from the arousal of consciousness illumination, from illumination emerges feeling of "I-am - that".

स्पन्दो[१२३] हर्ष[१२४] उत्साहो[१२५] निःस्पन्दो[१२६] नित्यसुखत्व[१२७]मिति पञ्चगुणः[१२८] परमानन्दः।।२३।।

spando harṣa utsāho niḥspando nityasukhatvamiti pañcaguṇaḥ paramānandaḥ ||23||

Paramānanda (supreme bliss) is with five qualities - throbbing, thrill, enthusiasm, quietude, eternal happiness.

---

११९. परमानदात् V.

१२०. ...दूदयः VII.

१२१. ...दूदयात् VII.

१२२. ...श्चोहं... VIII.

१२३. स्पन्दः I-X, XII.

१२४. हर्षः I-X, XII.

१२५. उत्साहः I-X, XII.

१२६. निःस्पंदः I-III, VIII, XII; निष्पंदः IV-V, VII, IX; निस्यंद VI; निःस्पन्द X; निष्पन्दो XI, XIII.

१२७. ...मुखत्व... VI.

१२८. पंचगुणं I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदय[१२९] उल्लासो[१३०]ऽवभासो[१३१] विकासः[१३२] प्रभा[१३३] पञ्चगुणः[१३४] प्रबोधः ।।२४।।

udaya ullāso'vabhāso vikāsaḥ prabhā pañcaguṇaḥ prabodhaḥ //24//

Awakening (prabodha) is with five qualities - arising (udaya), delight (ullāsa), splendor (avabhāsa), expansion (vikāsa), and radiance (prabhā).

सद्भावो[१३५] विचारः कर्त्तृत्वं[१३६] ज्ञातृत्वं[१३७] स्वतन्त्रत्वमिति[१३८] पञ्चगुण[१३९]श्चिदुदयः[१४०] ।।२५।।

sadbhāvo vicāraḥ karttūtvaṃ jñātūtvaṃ svatantratvamiti pañcaguṇaścidudayaḥ //25//

Cidudaya (arousal of consciousness) is with five qualities - existence, reflection, doer-hood, knower-hood and self-governed.

---

१२९. उदयः I-X, XII.

१३०. उल्लास I-III, VI, VIII-X, XII; उल्हास IV-V, VII.

१३१. अवभासः I-VIII, X, XII; विकासः IX

१३२. विकाशः IV-V, VII; अवभासः IX.

१३३. प्रभासः IX.

१३४. पंचगुण III, VI; पंचगुणाः VIII.

१३५. सद्भावः I-X, XII.

१३६. कर्मत्वां IV; कतृत्वं V; कर्तृत्वं IX.

१३७. ज्ञात्तृत्वं I; ज्ञात्तृत्वं II; अनुपलब्ध IV.

१३८. अनुपलब्ध IV.

१३९. अनुपलब्ध IV; पंचगुणा VIII.

१४०. अनुपलब्ध IV.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**निर्विकारत्वं[१४१] निष्कलङ्कत्वं[१४२] निर्विकल्पत्वं[१४३]
समता विश्रान्तिरिति[१४४] पञ्चगुणः प्रकाशः।।२६।।**

***nirvikāratvaṃ niṣkalaṅkatvaṃ nirvikalpatvaṃ
samatā viśrāntiriti pañcaguṇaḥ prakāśaḥ ||26||***

Illumination (prakāśa) is with five qualities - changelessness (nirvikāratva), stainlessness (niṣkalaṅkatva), ideation - less-ness (nirvikalpatva), equanimity (samatā) and the repose (viśrānti).

**अहन्ता अखण्डैश्वर्यं[१४५] स्वात्मता[१४६] विश्वानुभवसामर्थ्यं[१४७]
सर्वज्ञत्व[१४८]मिति पञ्चगुणः सोऽहम्भावः।।२७।।**

***ahantā akhanndaiśvaryaṃ svātmatā
viśvānubhavasāmarthyaṃ
sarvajñatvamiti pañcaguṇaḥ so'hambhāvaḥ ||27||***

Feeling of "I-am-that" is with five qualities - feeling of 'I-ness', wholesome, prosperity(akhandaisvarya),feeling of I-hood (svātmatā), ability of universal experience (viśvānubhava-sāmarthya) and omniscient-hood (sarvajñatva).

---

१४१. अनुपलब्ध IV.

१४२. अनुपलब्ध IV-V; निष्कलत्वं VI-VII, X-XII.

१४३. निर्विकल्पकत्वं VIII.

१४४. विभ्रांतिरिति V, XIII; विश्रान्तिः इति VIII, X.

१४५. अखंडैश्वर्यत्वं VIII.

१४६. स्वात्म IV.

१४७. विश्वानुभावसामर्थ्यं IV, IX; विश्वानुभवसामंर्थ्यं VI;
विश्वानुभवसामर्थ्य XII.

१४८. सर्वज्ञ IV; सर्वत्व VII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्याद्य[१४९] पिण्डस्य पञ्चतत्त्वं[१५०] पञ्चविंशतिगुणम्[१५१]।

ityādyapiṇḍasya pañcatattvaṃ pañcaviṃśatiguṇāḥ |

Thus are the five principles of ādyapiṇḍa with twenty five qualities.

उक्तञ्च -

utkañca -

परमानन्दः प्रबोधः चिदुदयः[१५२] चित्प्रकाशः[१५३] सोऽहमित्यन्त[१५४]
आद्यपिण्डो महातत्त्वगुणयुक्तः[१५५] समुत्थितः।।२८।।

paramānandaḥ prabodhaḥ cidudayaḥ citprakāśaḥ
so'hamityanta ādyapiṇḍo mahātattvaguṇayuktaḥ
samutthitaḥ ||28||

And it stated also -
Paramānanda (supreme bliss), awakening (prabodha), arousal of consciousness (cidudaya), illumination of consciousness (cit-prakāśa) and the feeling of I-am-that (so'ham) - it is from these the ādyapiṇḍa evolves from the great principles along with the qualities.

---

१४९. अनाद्य VIII.

१५०. पंचतत्व IV.

१५१. गुणाः IV-VI, VIII-X, XII; गुणः VII.

१५२. चित्प्रकााः VI, IX; अनुपलब्ध VIII.

१५३. चित्प्रकाा V; चिदुदयः VI; अनुपलब्ध IX.

१५४. सोहमित्यतः IV; IX; सोहंमित्यंत VII; सोहमत्यंतः VIII;
सोहम्भाव इत्यन्तः X; सोऽहम्भाव इत्यन्तः XII,
सोहऽम्भाव इत्यन्त XIII

१५५. महत्वगुणयुक्ते I-III; महातत्वगुणयुक्ते V-VIII; महातत्त्वयुक्तः XI.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आद्यान्महाकाशः[१५६] महाकाशान्महावायुः[१५७] महावायोर्महातेजः[१५८] महातेजसो[१५९] महासीललं महासीललान्महापृथ्वी[१६०] ।।२९।।

ādyānmahākāśṯaḥ mahākāśānmahāvāyuḥ mahāvāyormahātejaḥ mahātejaso mahāsalilaṃ mahāsalilānmahāpṛthvī ||29||

From the ādya (piṇḍa) the great ether (mahākaśa), from the mahākaśa (evolved) mahavāyu (the great air), from the great air (evolved) the great fire (mahāteja), from mahāteja the great water(mahāsalila) (and) from mahāsalila the great earth (mahāpṛthvī).

अवकाशोऽच्छिद्रत्व[१६१]मस्पृशत्वं[१६२] नीलवर्णत्वं शब्दत्वमिति[१६३] पञ्चगुणो[१६४] महाकाशः ।।३०।।

avakāśo'cchidratvamaspṛśatvaṃ nīlavarṇatvaṃ śabdatvamiti pañcaguno mahākāśaḥ ||30||

The five qualities of the mahākaśa are - space (avakāśa), impenetrability (acchidratva), non - touchability (aspṛśatva), blueness (nilavarṇatva) and sound.

---

१५६. ...महाकाशो XI, XIII.

१५७. ...वायुः महामहावायो IV; ....वायुर्महावायो XI, XIII.

१५८. महत्तेजः V; महतेजः VII; महातेजो XI, XIII,

१५९. महातेजो V, VII.

१६०. ...महापृथिवी IV, V, VII, XI.

१६१. ...अछिद्रत्वं IV, V, IX; अछिद्रं VI-VIII; अच्छिद्रं X, XII; अच्छित्वम् XI.

१६२. अस्पृयत्वं III, VIII, XI.

१६३. शब्दवत्वमिति I-III, VI, VIII, X-XII शब्दवस्यमिति VII.

१६४. पचगुणो - V, पंचगुणा - VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्चारः[१६५] चलनं[१६६] स्पर्शनं शोषणं धूम्रवर्णत्वमिति पञ्चगुणो[१६७] महावायुः ।।३१।।

sañcāraḥ calanaṃ sparśanaṃ śoṣaṇaṃ dhūmravaṇatvamiti pañcaguno mahāvāyuḥ ||31||

The five qualities of mahāvāyu are - mobility (sañcāra), movement (calan), touch ability (sparśan), drying (śoṣaṇa) and smoky in colour.

दाहकत्त्वं[१६८] पाचकत्वमुष्णत्वं[१६९] प्रकाशत्वं[१७०] रक्तवर्णत्वमिति[१७१] पञ्चगुणं महातेजः[१७२] ।।३२।।

dāhakatvaṃ pācakatvamuṣṇatvaṃ prakāśatvaṃ raktavarṇatvamiti pañcaguṇaṃ mahātejaḥ ||32||

The qualities of the mahāteja (the great fire) are - burning, ripening/digestion (pācakatva), hotness (uṣṇatva), light and red.

प्रवाहः आप्यायनं[१७३] द्रवो रसः श्वेतवर्णत्वमिति पञ्चगुणं महासलिलम्[१७४] ।।३३।।

---

१६५. सञ्चालनं X, XII-XIII.

१६६. चालनं V-IX; अनुपलब्ध X, XII-XIII.

१६७. पञ्चगुणा XII.

१६८. वाहकत्त्वं I -III; दाहवत्वं V; दाहकत्वं VI-XIII;
मसंख्यत्वम-अधिकपाठ VI.

१६९. पाचकत्वमे VI; पाकत्वं VII.

१७०. रंजकत्वं IV.

१७१. प्रकाकत्वमिति IV.

१७२. महस्तेजः VII.

१७३. अप्यायनं VII.

१७४. सलिलं VI.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

pravāhaḥ āpyāyanaṃ dravo rasaḥ śvetavarṇatvamiti pañcaguṇaṃ mahāsalilam ||33||

The qualities of the mahāsalila (the great water) - current/flow (pravāha), satiation (apyāyana), liquidity (drava), taste (rasa), and white in color.

स्थूलता नानाकातरता काठिन्यं[१७५] गन्धः पीतवर्णत्वमिति[१७६] पञ्चगुणा महापृथ्वी[१७७] ।।३४।।

sthulatā nānākāratā kāṭhinyaṃ gandhaḥ pītavarṇatvamiti pañcaguṇā mahāpṛthvī ||34||

The qualities of the mahāpṛthvī (earth) are - grossness (sthulatā), (capacity to) assume varied forms (nānākāratā), hardness, smell and yellow color.

इति महासाकारपिण्डस्य पञ्चतत्त्वं[१७८] पञ्चविंशतिगुणम्[१७९]

iti mahāsākārapiṇḍasya pañcatattvaṃ pañcavinśatiguṇaṃ |

These are the five elements of mahāsākārapiṇḍa with their twenty five qualities.

स एव शिवः। शिवाद्भैरवो भैरवाच्छ्रीकण्ठः [१८०] श्रीकण्ठात् सदाशिवः सदाशिवादीश्वर[१८१] ईश्वराद्रुद्रो[१८२] रुद्राद्विष्णु[१८३]र्विष्णोर्ब्रह्मा[१८४] ।।३५।।

---

१७५. काठिण्यं IV-V, VII, IX.

१७६. पीतवर्णत्व, इति XI.

१७७. महापृथिवी IV-V, VII, XI.

१७८. पंचतत्वं I-IV, VI-VII, IX, XI, XIII; पंचवर्णः - अधिकपाठ VIII.

१७९. पंचविंातिगुणाः IV-VII, IX-X, XII; पंचविंातिगुणः VIII.

१८०. भैरवात् श्रीगंठः IV.

१८१. सदाविवादधीश्वरः VIII.

१८२. ईश्वराद्रुद्रुः VII.

१८३. रूद्राद्दिष्णुः IV.

१८४. विष्णोर्ब्रह्मा I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

sa eva śivaḥ | śivādbhairavo bhairavācchrīkaṇṭhaḥ śrīkaṇṭhāt sadāśvaḥ sadāśivādīśvara īśvarādrudro rudrādviṣṇurviṣṇorbrahmā //35//

He himself is śiva. from śiva bhairava, from bhairava the śrīkaṇṭha, from śrīkaṇṭha the sadāśiva, from lord the sadāśiva the īśvara, from īśvara the rudra, from rudra the viṣṇu and from viṣṇu the brahma.

इति[१८५] महासाकारपिण्डस्य मूर्त्त्यष्टकम् ।

iti mahāsākārapiṇḍasya mūrttyaṣṭakam /

These are the eightfold forms of the mahāsākārapiṇḍa.

तत्र[१८६] ब्रह्मणः[१८७] सकाशादवलोकनेन[१८८] नरनारीरूप[१८९] प्रकृतिपिण्ड उत्पन्नः [१९०] तच्च पञ्चपञ्चात्मकं शरीरम्[२००] ।।३६।।

tatra brahmhaṇaḥ sakāśādavalokanena naranārīrūpaprakṛtipiṇḍa utpannaḥ tacca pañcapañcātmakaṃ śarīram //36//

There, through the will of brahmā, the male - female body with twenty five in qualities was originated.

१८५. एव VIII-IX.

१८६. ततो IV; तत्तद् V-VI, VIII, X, XII; तत्त VII; ततोद् IX तद् XIII.

१८७. ब्रह्मणः I.

१८८. सावकाादवलोकनेन IV-V, VII; साकाादवलोकनेन IX.

१८९. ननरनारीरूप III; नरनारीरूपं IV-VII, IX; नरनरनारीरूपं VIII; नरनारीरूपः X, XIII.

१९०. उत्पन्नं III-VIII; उत्पंनं IX; समुत्पन्नः X, XII-XIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्थि[२०१]-मांस[२०२]त्वङ्-नख[२०३]-रोमाणीति[२०४] पञ्चगुणा भूमिः ।।३७।।

asthimāmsatvaṅnakharomāṇīti pañcaguṇā bhūmiḥ //37//

Bhumi (earth) has five qualities (guṇas) - bone, flesh, skin, nails and hair.

लाला मूत्रं शुक्रं[२०५] शोणितं[२०६] स्वेद[२०७] इति पञ्चगुणा[२०८] आपः ।।३८।।

lālā mūtraṃ śukraṃ śoṇitaṃ sveda iti pañcaguṇā āpaḥ //38//

āpa (water) has five qualities - saliva, urine, semen, blood and sweat.

क्षुधा तृषा[२०९] निद्रा कान्तिरालस्यमिति[२१०] पञ्चगुणं तेजः ।।३९।।

kṣudhā tṛṣā nidrā kāntirālayasyamiti pañcaguṇaṃ tejaḥ //39//

Teja (fire) has five qualities - hunger, thirst, sleep, luster and laziness.

---

२००. शरीरमिति X, XII.

२०१. अस्ति VIII.

२०२. मांसः

२०३. लुप्त IV-V, VII; नाडी VI, VIII-XIII.

२०४. इस के बाद 'नाडी' अधिकपाठ IV, V, VII एवं 'इति' लुप्त IV.

२०५. शुक्लं V, VI, VIII-IX; शुक्ल VII.

२०६. शोणात्त VII.

२०७. स्वेदं VIII; स्वेदः XI.

२०८. पंचगुणम् V, VII; पंचगुण VI.

२०९. तृष्णा IV.

२१०. कांति आलस्यमिति III, VII, VIII; क्लान्तिरालस्यमिति X, XII

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धावनं[२११] प्लवनं[२१२] प्रसारणमाकुञ्चनं[२१३] निरोधनमिति[२१४] पञ्चगुणो वायुः[२१५]।।४०।।

dhāvanaṃ plavanaṃ prasāraṇamākuñcanaṃ nirodhanamiti pañcaguṇo vāyuḥ //40//

Vāyu (air) has five qualities - running, leaping, spreading (expansion), contraction and restraint.

रागो द्वेषो[२१६] भयं[२१७] लज्जा[२१८] मोह[२१९] इति पञ्चगुण[२२०] आकाशः[२२१]।।४१।।

rāgo dveṣo bhayaṃ lajjā moha iti pañcaguṇa ākāśaḥ //41//

ākāśa (ether) has five qualities - attachment, hatred, fear, shame and infatuation.

इति पञ्चविंशतिगुणानां[२२२] भूतानां[२२३] प्रकृतिपिण्डः।

iti pañcavinśatiguṇānāṃ bhūtānāṃ prakṛtipiṇḍaḥ /

---

२११. धावनमवन VI; धावनमवनं VII, IX.

२१२. वल्गानं I-II; मवनं IV; वमनं I; आवनं VIII.

२१३. प्रसरणं आकुंचनं IV; प्रासारणमाकुंचनं IX.

२१४. सिरोधनमिति IV. निरोधनं VIII.

२१५. महावायुः V.

२१६. द्वेषोद् I-II; द्वेषो IV; द्वेशो VII; द्वेषं VIII.

२१७. यथा VIII.

२१८. लज्ञा VII; प्रज्ञा VIII.

२१९. मोहं IV-V, VII-VIII

२२०. पंचगुणम् VII; पंचगुणा VIII.

२२१. महाकाशः V.

२२२. पचविंातिगुणानां V.

२२३. अनुपलब्ध IV-V, VII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Thus the piṇḍa śarīra (physical body) is (formed) of twenty five qualities of physical elements.

मनो बुद्धिरहङ्कारश्चित्तं[२२४] चैतन्य[२२५]मित्यन्तःकरणपञ्चकम्[२२६] ।।४२।।

manobuddhirhaṅkāraścittaṃ
caitanyamityantaḥkaraṇapañcakam //42//

The internal organ is five -fold- mana (mind), buddhi (intellect), ahaṅkār (ego), citta (loci of consciousness) and consciousness.

सङ्कल्पो[२२७] विकल्पो मूर्च्छा जडता मननमिति पञ्चगुणं मनः[२२८] ।।४३।।

sañkalpo vikalpo mūrchā jaḍatā mananamiti
pañcaguṇaṃ manaḥ //43//

Mind (manah) is with five- fold qualities - resolution (saṅkalpa), imagination (vikalpa), stupor (mūrcchā), sloth (jaḍatā) and reflection (manana).

विवेकी वैराग्यं शान्तिः[२२९] सन्तोषः[२३०] क्षमेति पञ्चगुणा[२३१]
बुद्धिः ।।४४।।

vivekī vairāgyaṃ śāntiḥ santoṣaḥ kṣameti pañcaguṇā
buddhiḥ //44//

---

२२४. बुध्यहंकारश्चित्तं IX.
२२५. बैतन्यं... IV; चैतन्यांतः IX.
२२६. ...करणं पञ्चकम् IV.
२२७. संलल्प V.
२२८. मनं VIII.
२२९. शाति VII.
२३०. संतोश VII.
२३१. पंचगुण V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

buddhi (intellect) is with five - fold qualities- discrimination (vivekī), detachment(vairāgya), tranquility (śānti), contentment (santoṣa) and forgiveness (kṣamā) .

अभिमानं[२३२] मदीयं मम सुखं मम दुःखं[२३३] ममेदमिति पञ्चगुणोऽहङ्कारः ।।४५।।

abhimānaṃ madīyaṃ mama sukhaṃ mama duḥkhaṃ mamedamiti pañcaguṇo'haṅkāraḥ //45//

ahaṅkāra (ego) is with five - fold qualities - pride (abhimāna), mine (madīyam), my pleasure, my sorrow, and mine.

मतिर्धृतिः स्मृतिस्त्यागः[२३४] स्वीकार इति पञ्चगुण चित्तम् ।।४६।।

matirdhṛtiḥ smṛtistyāgaḥ svīkāra iti pañcaguṇa cittam //46//

Citta has five qualities - intellect, patience, memory, sacrifice and acceptance.

विमर्शः[२३५] शीलनं[२३६] धैर्यं[२३७] चिन्तनं निःस्पृहत्वमिति पञ्चगुणं[२३८] चैतन्यम् ।।४७।।

vimarśaḥ śīlanaṃ dhairayaṃ cintanaṃ niḥspṛhatvamiti pañcaguṇaṃ caitanyam //47//

---

२३२. अभिमानः IV; अभिमानः XI.

२३३. दुखं VII.

२३४. त्यागी IX.

२३५. विर्मा V.

२३६. तत् अधिक पाठ I-II; तच्छीलं अधिक पाठ III.

२३७. धैर्यं IV.

२३८. 'पञ्च' लुप्त I-III.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Chaitanya is of five qualities - vimarśa (deliberation), śīlana (repeated practice), dhairya (firmness/courage), cintana (thinking) and niḥspūhatvam (indifference).

एवमन्तःकरणगुणाः।

evamantaḥkaraṇaguṇāḥ /

Above mentioned twenty-five are the qualities of antaḥ-karaṇa.

सत्त्वं रजस्तमः कालो[२३९] जीव इति कुलपञ्चकम्[२४०] ।।४८।।

sattvaṃ rajastamaḥ kālo jīva iti kulapañcakam //48//

sattva, raja, tama, kāla (time), jīva (embodied soul) are the five types of kula.

दया धर्मः[२४१] कृपा[२४२] भक्तिः[२४३] श्रद्धेति[२४४] पञ्चगुणं सत्त्वम् ।।४९।।

dayā dharmaḥ kūpā bhaktiḥ śraddheti pañcaguṇaṃ satvattvam //49//

Dayā (compassion/sympathy), dharma (right conduct), kūpā (favour), bhaktī (devotion), śraddhā (faith) are the five qualities of sattva.

दानं भोगः श्रृङ्गारो वस्तुग्रहणं[२४५] स्वार्थसंग्रहणमिति[२४६] पञ्चगुणं[२४७] रजः।।५०।।

---

२३९. काल V, VII.

२४०. कुलपंचक VII.

२४१. धर्म VIII.

२४२. क्रिया XIII.

२४३. शक्तिः VIII.

२४४. श्रद्धः VIII.

२४५. वस्तुग्रहणं V, VII.

२४६. स्वार्थमिति IV-X, XII.

२४७. पंचगुणो VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

dānaṃ bhogaḥ śṛṅgāro vastugrahaṇaṃ svārthasaṅgrahaṇamiti pañcaguṇaṃ rajaḥ //50//

Dāna (charity), bhoga (enjoyment), shūngār (ornamentation), vastugrahaṇa (appropriation), svārthasaṅgrahaṇam (selfish collection) are the qualities of rajas.

विवादः शोकः[२४८] कलहो[२४९] बन्धो[२५०] वञ्चनमिति[२५१] पञ्चगुणं[२५२] तमः ।।५१।।

vivādaḥ śokaḥ kalaho bandho vañcanamiti pañcaguṇa tamaḥ //51//

vivāda (dispute), śoka (sorrow/grief), kalaha (quarrel/strife), bandha (bond), vañcanam(cheating/deception) are the five qualities of tama.

कलना कल्पना भ्रान्तिः प्रमादोऽनर्थ इति पञ्चगुणः[२५३] कालः ।।५२।।

kalanā kalpanā bhrāntiḥ pramādo'nartha iti pañcaguṇaḥ kālaḥ //52//

Kalanā (numbers/stages/counting), kalpanā (imagination), bhrānti (delusion), pramāda (acting in a careless manner), anartha (misfortune/worthless) are the five qualities of kāla (time).

---

२४८. कलहः VI, XI, XIII; शोक VIII.

२४९. शोकः VI; XI; XIII

२५०. वधः IV-VI, IX विधः VII; मदो VIII.

२५१. वंचंनमिति II.

२५२. पंचगुणो VIII.

२५३. पंचगुणाः I; पंचगुणं VII-VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाग्रत्स्वप्नः[२५४] सुषुप्तिस्तुर्यं[२५५] तुर्यातीतमिति[२५६] पञ्चावस्थागुणो[२५७] जीवः ।।५३।।

jāgratsvapnaḥ suṣuptisturyaṃ turyātītamiti pañcāvasthāguṇo jīvaḥ //53//

Jāgrat (waking), svapna (dream), suṣupti (deep sleep), turya (fourth state of consciousness), turyātīta (beyond the fourth state) are the five qualities of jīva (a being/embodied soul).

इच्छा[२५८] क्रिया[२५९] माया प्रकृतिर्वागिति व्यक्तशक्तिपञ्चकम्[२६०] ।।५४।।

icchā krīyā māyā prakṛtirvāgiti vyaktaśaktipañcakam //54//

icchā (desire), kriyā (action), māyā (illusion), prakūti (root cause/origin), vāk (speech) are the five qualities of śakti (energy).

उन्मादो वासना वाञ्छा[२६१] चिन्ता चेष्टेति[२६२] पञ्चगुणेच्छा[२६३] ।।५५।।

unmādo vāsanā vāñchā cintā ceṣṭeti pañcaguṇecchā //55//

---

२५४. जाग्रत् स्वप्न III; IX; जाग्रत् स्वप्नं IV.
२५५. सुषुप्ति III; सुषुप्तिः तुर्या IV; सुषुप्ति तुर्यं V, VII; सुषुप्तिः तुरीया XI; सुषप्तिस्तुरीया XIII.
२५६. तुर्यातीता इति I-III; उन्मनीतीतमिति IX; तूर्यातीतमिति X, XII.
२५७. पञ्चगुणावस्यो XI.
२५८. इछा III-IX; ज्ञान-अधिकपाठ IX.
२५९. क्रियां VII.
२६०. व्यक्तिाक्तिपंचकं IV-X, XII.
२६१. वांच्छा I; वाछा VII.
२६२. चेष्ठा इति VI.
२६३. पंच इछा V; पंचगुणा इछा VI-VIII; पंचगुणेछा IX.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

unmāda (madness), vāsanā (impressions), vañchā (longing for), cintā (anxiety), ceṣṭā (activity/efforts) are the five qualities of icchā (desire).

स्मरणमुद्योगः कार्य[264] निश्चयः [265] स्वकुलाचार[266] इति पञ्चगुणा[267] क्रिया ।।५६।।

smaraṇamuddyogaḥ kāryaṃ niścayaḥ svakulācāra iti pañcaguṇā kriyā //56//

Smaraṇa (remembering), udyoga (effort), kārya (activity), niścaya (resolution, svakulācāra (conduct of own family) are the five qualities of kriyā (action).

मदो मात्सर्यं दम्भः[268] कृत्रिमत्व[269]मसत्यमिति पञ्चगुणा[270] माया ।।५७।।

mado mātsaryaṃ dambhaḥ kṛtrimatvamasatyamiti pañcaguṇā māyā //57//

mada (arrogance), mātsaryam (envy), dambhaḥ (deceit), kūtrimatvam (artificialness), asatyam (untruth/falsehood) are the five qualities of māyā (illusion).

आशा[271] तृष्णा[272] स्पृहाकाङ्क्षा मिथ्येति पञ्चगुणा प्रकृतिः ।।५८।।

---

२६४. कार्य V, VIII; कांर्य IX.

२६५. निश्चयं VIII.

२६६. स्वकुलाचारं V, VII-VIII.

२६७. पचगुणा V; पंचगुण VII; पंचगुणं VIII.

२६८. दंभं V; दंभ VII; डंभं VIII.

२६९. कृत्रिमंत्वं VII; क्रित्रिमत्वं IX.

२७०. पंचगुण V; या सा - अधिकपाठ VI.

२७१. क्षुत् VIII.

२७२. तृषा V, VII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

āśā tṛṣṇā spṛhākāṅkṣā mithyeti pañcaguñā prakṛtiḥ //58//

āshā(hope), tṛṣṇā (craving), spṛhā (deep desire), kaṅkṣā (inclination), mithyā (unreal/false) are the five qualities of prakṛti (origin).

परा पश्यन्ती[२७३] मध्यमा वैखरी मातृकेति[२७४] पञ्चगुणा[२७५] वाक्[२७६]।।५९।।

parā paśyantī madhyamā vaikharī mātṛketi pañcaguṇā vāk //59//

parā, paśyantī, madhyamā, vaikharī, mātṛkā (bījamantrarūpa varṇamālā) are the five types of vāk (speech).

इति[२७७] व्यक्त[२७८]शक्ति[२७९]पञ्चविंशति[२८०]गुणाः।[२८१]

iti vyaktya śakti pañcavinśati guṇāḥ /

These are the twenty-five qualities of vyakta śakti (manifested energy).

कर्म कामश्चन्द्रः सूर्योऽग्निरिति प्रत्यक्षकरणपञ्चकम्[२८२] ।।६०।।

---

२७३. पयंति I-III, V, IX.

२७४. मातृक इति VI, X, XII; मात्तृका इति VII; वागिति IX.

२७५. अनुपलब्ध IX, पञ्चगुणा अधिकपाठ X, XII.

२७६. अनुपलब्ध IX.

२७७. अनुपलब्ध IX.

२७८. व्यक्ति IV-X, XII.

२७९. इसके अनन्तर 'पंचकस्य' अधिकपाठ

२८०. पंच VIII.

२८१. व्यस्तिास्तिपंचकम् IX.

२८२. प्रत्यक्षकारणपंचकं IV; प्रत्यक्षं करणंपंचक V; प्रत्यक्षकं पंचकं VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

karma kāmaścandraḥ sūryo'gniriti pratyakṣakaraṇapañcakam //60//

Karma (action), kāma (desire), candra (moon), sūrya (sun), agni (fire) are the five means of pratyakṣa (direct perception).

शुभमशुभं यशोऽपकीर्त्तिरदृष्टफल[२८३]साधनमिति पञ्चगुणं कर्म।।६१।।

śubhamśubhaṃ yaśo'pakīrttiradṛṣṭaphala sādhanamiti pañcaguṇaṃ karma //61//

śubha (auspicious), aśubha (inauspicious), yasha(success), apakīrti (infamy), adṛṣṭa-phala-sādhanam (instrument of unseen effect) are the five qualities of karma (action).

रतिः प्रीतिः[२८४] क्रीडा कामनाऽऽतुरतेति[२८५] पञ्चगुणः [२८६] कामः।।६२।।

ratiḥ prītiḥ krīḍā kāmanā''turateti pañcaguṇaḥ kāmaḥ //62//

Rati (enjoyment), prīti (affection), krīdā (amorous play), kāmanā (desire/lust), āturatā (longing) are the five qualities of kāma (lust/pleasure).

---

२८३. अदृष्याफल I-II.

२८४. अनुपलब्ध IV.

२८५. अतुरता इति V.

२८६. पंचगुणाः V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उल्लोला[२८७] कल्लेलिनी[२८८] उच्चलन्ती[२८९] उन्मादिनी[२९०] तरङ्गिणी[२९१] शोषिणी[२९२] अलम्पता[२९३] (प्रवृत्तिर्लहरी[२९४]) लोला लेलिहाना प्रसरन्ती[२९५] प्रवाहा[२९६] सौम्या[२९७]प्रसन्ना प्लवन्ती[२९८]। एवं चन्द्रस्य षोडश कलाः। सप्तदशी[२९९] कला निवृत्तिः [३००]। साऽमृतकला ।।६३।।

ullolā kallelinī uccalantī unmādinī taraṅgiṇī śoṣiṇī alampatā (pravūttirlaharī) lolā lelihānā prasarantī pravāhā saumyā prasannā plavantī / evaṃ candrasya ṣoḍaśa kalāḥ/ saptadaśī kalā nivṛttiḥ / sā'mṛtakalā //63//

ullolā(dangling), kallolinī (surging), uccalantī (bouncing), unmādinī (causing insanity), taraṅgiṇī (waving), śoṣiṇī (sucking), alampatā (non-covetous), lolā (swinging), lelihānā (frequently licking), prasarantī (spreading), pravāha (flowing), saumya (mild),

---

२८७. उक्तोला III; उल्लोलिनी X, XII; उल्लोका XI.

२८८. कलिनी V.

२८९. उच्चलंति VI.

२९०. उन्मादनी IV.

२९१. तरगिणी V.

२९२. शोषणी IV, VIII-IX.

२९३. लंपटा IV-IX, XI.

२९४. प्रकृतिः लहरी IX.

२९५. प्रसरंति VI; प्रनांति VIII.

२९६. प्रवहा I-III; प्रवाहः IV, VII; प्रवाह V, VIII.

२९७. सौम्य VIII.

२९८. -वंति V, VII-VIII; -वंतिः VI.

२९९. सप्तदश IV-V, VII-VIII.

३००. निर्वृतिः IV.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

prasanna (cheerful), plavantī (overflowing) these are the sixteen fractions/phases of Chandra (moon). Seventeenth kalā (fraction/ phases) is nivrṛttī (inaction) which is a fraction/phases of honeydew.

तापिनी[३०१] ग्रासिका[३०२] (उग्राऽऽकुञ्चिनी) [३०३] शोषिणी[३०४]
प्रबोधिनी (स्मरा[३०५]ऽऽकर्षिणी[३०६]) तुष्टिवर्द्धिन्यू[३०७]र्मि[३०८]रेखा
किरणवती[३०९] प्रभावतीति द्वादश[३१०] कलाः [३११] सूर्यस्य[३१२]।
त्रयोदशी[३१३] स्वप्रकाशता[३१४] निजकला ।।६४।।

---

३०१. तपिनी I-II, IV-VIII, XIII; तपनी III, IX.

३०२. ग्रासका III-IX.

३०३. उग्र आकुंचनी VIII; उग्रा अंकुचिनी IV; उग्रा आकुंचनी V, IX; उग्रा अकुञ्चिनी XI.

३०४. शोषणी VIII-IX.

३०५. रवस्तरा VIII.

३०६. आकर्षणी VII, IX.

३०७. तुष्टीः वर्धिनी IV; उष्टीवर्धिनी VII; तुष्टिबर्धिनी VIII; तुष्टिवर्धिनी IX-XI-XII.

३०८. ऊर्मी I, II, III; उर्मि V, IX; उर्मी VI, X, XII.

३०९. किरणागतिः IV-V, VII; किरणावती-अधिकपाठ VIII.

३१०. सूर्यस्य VIII.

३११. कला V, IX; द्वादा VIII.

३१२. कला VIII.

३१३. त्रयोदां VIII.

३१४. प्रकाशता IX.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

tāpinī grāsikā (ugrā''kuñcini) śoṣiṇī prabodhinī (smarā''karṣiṇī) tuṣṭirvarddhinyūrmirekhā kiraṇavatī prabhāvatīti dvādaśa kalāḥ sūryasya / trayodaśī svaprakāśatā nijakalā //64//

Tapinī (heating), grāsikā (swallowing), ugrā (ferocious), akuñchanī (contracting), śoṣiṇī (sucking), prabodhinī (awakening), smarā (remembering), ākarṣiṇī (attracting), tuṣṭivardhinī(satisfying), ūrmirekhā (row of ripples), kiraṇāvatī (full of rays) and the prabhāvatī (illuminating) (thus) these are the twelve phases of sun.

Thirteenth phase is svaprakāśatā (self- illuminating).

दीपिका[३१५] राजिका[३१६] ज्वलनी[३१७] विस्फुलिङ्गिनी[३१८] प्रचण्डा पाचिका[३१९] रौद्री दाहिका[३२०] रागिणी शिखावतीत्यग्नेर्दश कलाः। एकादशी कला[३२१] ज्योतिः [३२२]।।६५।।

dīpikā rājikā jvalanī visphuliñginī pracañḍā pācikā raudrī dāhikā rāgiṇī śikhāvatītyagnerdaśa kalāḥ/ ekādaśī kalā jyotiḥ //65//

dīpikā (kindling), rājikā (kindling), jvalanī (blazing), visphunliṅginī (sparkling), pracaṇḍā (fierce/a excessively

---

३१५. दापिका V.

३१६. राजका VIII.

३१७. ज्वलिनी III, X, XII; ज्वालिनी IV-VII, IX, XI; जहलिनी VIII.

३१८. स्फुलिंगिनी I-III, XI.

३१९. पाचका V, IX; वाचका VIII.

३२०. दाहका I-VIII.

३२१. निजकला VIII.

३२२. निरुपाधिका ज्ञेया - अधिकपाठ XI.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

violent), pācikā(cooking), roudrī (dreadful), dāhikā (burning), rāgiṇī(coloring), śikhāvatī (flaming) are the ten kalas (phases/ forms)of agni (fire), eleventh form is jyotī (flame).

इति[३२३] प्रत्यक्षकरण[३२४]गुणकलासमूहः।।

iti pratyakṣakaraṇa guṇakalāsamūhaḥ //

This is the group of perceptible qualities and forms (aspects).

अथ नाडीनां दश द्वाराणि -
इडा पिङ्गला[३२५] च[३२६] नासाद्वारयोर्वहतः।
सुषुम्ना तालुमार्गेण ब्रह्मरन्ध्रपर्यन्तं[३२७] वहति।[३२८]
सरस्वती मुखद्वारे वहति।[३२९]
पूषाऽलम्बुषा[३३०] च[३३१] चक्षुद्वारयोर्वहतः[३३२]।

---

३२३. इतीति - अधिकपाठ VII.
३२४. ...कुरण III; प्रत्यक्ष IV-V, VII, X, XII.
३२५. पिंडाला III; पींगला V; पिंगले IX.
३२६. अनुपलब्ध IV-IX.
३२७. ब्रह्मरंध्रं IV; ब्रह्मरंध्रं V, VII.
३२८. इसके स्थान पर 'गांधारी हस्तिजिह्विका च चक्षुर्द्वारयोर्वहतः I-II; गांधारी हस्क्षिजिह्विका .. .. III; गान्धारी हस्तिजिह्वा.. .. XI; गान्धारी हस्तिजिह्विका .. .. XIII.
३२९. इसके स्थान पर 'कर्णद्वारयोर्वहतः पूषा यास्विनी च' I-III; पूषा यास्विनी च कर्णद्वारयोर्वहतः XI, XIII.
३३०. अलंपूषा IV; आलंबुषा V, VII; अलंबुसा VIII; अलंबुषे IX,
३३१. अनुपलब्ध I-IX, XI, XIII.
३३२. इसके स्थान पर 'अलम्बुषा आनने वहति' I, II, XI, XIII; .. .. वहंति III.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गान्धारी हस्तिजिह्विका[३३३] च[३३४] कर्ण द्वारयोर्वहतः।[३३५]

कुहू[३३६] गुदद्वारे[३३७] वहति[३३८]।[३३९]

शङ्खिनी[३४०] लिङ्गद्वारे[३४१] वहति।[३४२]

सुषुम्णा[३४३] मध्यदेशे[३४४] वहति[३४५]। सा[३४६] दण्डमार्गेण[३४७] ब्रह्मरन्ध्रपर्यन्तं[३४८] वहति[३४९]।

---

३३३. हस्तिजिव्हिका VI; हस्क्षिनीजिव्हाका VII; हस्क्षिजिव्हिके IX.

३३४. अनुपलब्ध I-IX, XI, XIII.

३३५. इसके स्थान पर 'कुहुर्गुदद्वारे वहति' I- III; 'कुड्लू गुदद्वारे .. ...' IV; 'कुहूगुदद्वारे .. .. ' V; 'कुहूर्गुदद्वारे .. .' XI, XIII.

३३६. सुषुम्णा I-III, XI, XIII; शंखिनी VI-VII, IX-X, XII.

३३७. मध्यदेशे I-III, XI, XIII; लिंगद्वारे VI-VII, IX-X, XII.

३३८. सा दंडमार्गेण व्रह्मरंध्रपर्यतं वहति - अधिक पाठ I, III; सा दंडमार्गेण ब्रह्मरंध्रपर्यंतं वहति - अधिक पाठ II, IV-VIII, X, XII-XIII; सा मेरूदण्डमार्गेण ब्रह्मरन्ध्रपर्यंतं वहति - अधिक पाठ XI.

३३९. अनुपलब्ध - सम्पूर्ण पंक्ति IV-V.

३४०. कुहूर् VI, IX, कुहू VII; कुहूः X, XII.

३४१. गुदव्दारे VI-VII, IX-X, XII.

३४२. संपूर्ण पंक्ति अनुपलब्ध VIII.

३४३. अनुपलब्ध IV-V; शंखिनी VI-VII, IX-X, XII; कुहू VIII.

३४४. अनुपलब्ध IV-V; लिंगद्वारे VI-VII, IX-X, XII; गुदद्वारे VIII.

३४५. अनुपलब्ध IV-V.

३४६. अनुपलब्ध IX.

३४७. अनुपलब्ध IX; मेरूदण्डमार्गेण XI.

३४८. व्रह्मरंध्रपर्यंतं I, III; अनुपलब्ध IX.

३४९. अनुपलब्ध IX.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं दश[३५०] नाड्यो[३५१] दशद्वारेषु[३५२] वहन्ति[३५३]।
अन्याः[३५४] सर्व[३५५]नाड्यो[३५६] रोमकूपेषु वहन्ति[३५७]।।६६।।

atha nāḍīnāṃ daśa dvārāṇi -
iḍāpiṅgalā ca nāsādvārayorvahataḥ /
suṣumnā tālumārgeṇa brahmarandhraparyantaṃ vahati /
sarasvatī mukhadvāre vahati /
pūṣā'lambuṣā ca cakṣudvārayorvahataḥ /
gāndhārī hastijihvikā ca karṇa dvārayorvahataḥ /
kuhū gudadvāre vahati /
śaṅkhinī liṅgadvāre vahati /
suṣmṇā madhyadeśe vahati / sā daṇḍamārgeṇa
brahmarandhraparyantaṃ vahati/
evaṃ daśa nāḍyo daśadvāreṣū vahanti /
anyāḥ sarvā nāḍyo romakūpeṣu vahanti //66//

Hereafter, ten entrances of nāḍis (channels) are described - Idā and piṅgalā flow through the nostrils.

Suṣumnā flows through the passage of palate untill the brahmarandhra (a aperture in the crown of the head through which the soul is said to escape on death).

Saraswatī flows from mouth.

Puṣā and alambuṣā flow through the eyes.

---

३५०. अनुपलब्ध IV-X, XII.

३५१. अनुपलब्ध IV-X, XII.

३५२. दासु द्वारेषु XI.

३५३. वसंति IV-V, VII; वारुणी पयस्वीनी च - अधिकपाठ IX.

३५४. अन्यः I

३५५. सर्वा I, X, XI.

३५६. नाडयोः V.

३५७. वसंति IV-V, VII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Gāndhārī and hastijihvā flow through the ears.

Kuhū flows through anus.

Saṅkhinī flows through generative organs.

Suṣumnā flows through mid-region. She flows till the brahmarandhra through the daṇḍamārga (spine).

Like this, these ten nāḍis (channels) flow through ten entrances. Remaining all channels flow through romkūpa (pore of the skin).

अथ दश[३५८] वायवः -

atha daśa vāyuḥ -

Now ten Vāyus -

हृदये[३५९] प्राणवायुरुच्छ्वास[३६०]निःश्वास[३६१] -
कारकोहकारस्सकारात्मकश्च[३६२]।

hṛadaye prāṇavāyurucchvāsa
niḥśvāsakārakohakārassakārātmakaśca /

Prāṇa vāyu is in heart and causes inhalation and exhalation and is of the nature of 'ha' and 'sa' sound.

गुदे त्व[३६३]पानवायुर्रेचकः कुम्भकः[३६४] पूरकश्च[३६५]।

gude tva pānavāyurrecakaḥ kumbhakaḥ pūrakaśca /

apān vāyu is in anus and (is responsible for) exhalation, retention and inhalation.

---

३५८. अनुपलब्ध VII.

३५९. हृदय VII.

३६०. उच्छास I-III.

३६१. निश्वा VI; निरूश्वास VIII.

३६२. दीपकः पाचकश्च V.

३६३. 'तु' लुप्त VIII-IX

३६४. कुंभकश्च IV-X, XII; पूरकः XI.

३६५. अनुपलब्ध IV-X, XII; कुम्भकश्च XI.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाभौ समानवायुर्दीपकः[३६६] पाचकश्च[३६७]।

nābhau samānavāyurdīpakaḥ pācakaśca /

samāna vāyu is in novel and causes heat and digestion.

सर्वाङ्गे[३६८] व्यानवायुः[३६९] सर्वनाडी[३७०]शोधन[३७१]कारकश्चलो[३७२] निश्चलश्च[३७३]।

sarvāṅge vyānavāyuḥ sarvanāḍīśodhana kārakaścalo niścalaśca /

vyāna vāyu is throughout the body and is movable and steady and engenders entire nadis purified.

कण्ठे[३७४] उदानवायु[३७५]र्ग्रसन-वमन-जल्प[३७६]कारकश्च[३७७]।

kaṇṭhe udānavāyurgrasana-vamana-jalpakārakaśca /

udāna vāyu is in the throat and causes swallowing, omitting and articulation.

---

३६६. दीपक VIII.

३६७. पावकश्च I.

३६८. कंठे IV-VIII, X, XII, XIII; सर्वशरीरगे IX

३६९. इसकेबाद दीपकः - अधिकपाठ II.

३७०. लुप्त X-XIII

३७१. शोंधन II; शोषणाप्यायन IV-X,XII-XIII

३७२. अनुपलब्ध IV-X, XII-XIII

३७३. अनुपलब्ध IV-X, XII-XIII

३७४. कंठ III, XI; तालौ VI, VIII-X, XII-XIII.

३७५. व्यानवायुः IV-V, VII.

३७६. सर्वनाडीशोषणाप्यायन IV-V, VII.

३७७. कारश्च XII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागवायुः सर्वाङ्ग[३७८]व्यापको मोचक[३७९]श्चालकश्च[३८०]।

nāgavāyuḥ sarvāṅgavyāpako mocakaścālakaśca /

nāga vāyu pervades all the limbs and causes release and motion.

कूर्मवायुः[३८१] चक्षुषोरुन्मेष[३८२]कारकश्च[३८३]।

kūrmavāyuḥ cakṣuṣorunmeṣakārakaśca /

kūrma vāyu causes blinking of eyes.

कृकलः[३८४] उद्गारकः[३८५] क्षुत्कारश्च

kṛkalaḥ udgārakaḥ kṣutkāraśca

kṛkala vāyu causes belching and hunger.

देवदत्तो[३८६] मुख[३८७]विजृम्भकः[३८८]।

devadatto mukha vijṛmbhakaḥ /

devadatta is in mouth and causes yawning.

धनञ्जयो[३८९] नादघोषकः[३९०]।।६७।।

---

३७८. सवांग II

३७९. मोहक I-III, VIII, XI; XIII

३८०. शालकश्च VIII.

३८१. इस के अनन्तर 'कम्पकः' अधिकपाठ I-III, XI

३८२. चक्षुरुन्मेष IV-IX

३८३. 'च' लुप्त VIII-IX.

३८४. क्रकल V, VII; कृकरः VIII; इस के बाद 'वायु' अधिकपाठ IX

३८५. 'कः' लुप्त VIII; 'च' अधिकपाठ X, XII.

३८६. इस के अनन्तर 'वायु' अधिकपाठ IX.

३८७. मुखे IV-X, XII

३८८. जंभकः IV; जुंभकः V-IX.

३८९. इस के अनन्तर 'वायु' अधिकपाठ IX

३९०. नाकः I-III, XI; दानघोपकः IV.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

dhanañjayo nādaghoṣakaḥ //67//

dhanañjaya generates Nāda.

इति दशवायुर[391]वलोकनेन[392] पिण्डोत्पत्ति[393]-र्नरनारीरूपा[394]।[395]

iti daśavāyuravalokanena piṇḍotpattirnaranārīrūpā /

under the superintendence of these above mentioned ten vāyus the body of male - female is born.

अथ गर्भोलि[396]पिण्डोत्पत्तिर्नरनारीसंयोगे[397] ऋतुकाले -

atha garbholi piṇḍorpattirnanārīsamyoge ṛtukāle -

Now is stated the origin of the body of embryo owing to the union of male and female at the conducive period for conception-

रजोबिन्दुसंयोगे[398]स[399] जीवः प्रथमदिने कललं[400] भवति।

rajobindusamyoge sa jīivaḥ prathamadine kalalaṃ bhavati /

सप्तरात्रे[401] बुद्बुदाकारं[402] भवति।

saptarātre bubudadākāraṃ bhavati/

---

३९१. वायवः I-III; वायु X, XII-XIII

३९२. अनुपलब्ध I-III.

३९३. अनुपलब्ध I-III.

३९४. अनुपलब्ध I-III; ...रूपं V-IX, XIII

३९५. सम्पूर्णपद लुप्त IX

३९६. गर्भोत्थ I-II, XI-XIII; गर्भोत्थं III; गभोस्ति IV; गर्भालि V; गर्भोली IX.

३९७. ...संगे IV.

३९८. ...संयोगेन VIII.

३९९. अनुपलब्ध I-III; VIII, XI, XII.

४००. कलनं VIII; कलिलं XI.

४०१. सप्तरात्रेण I-III, XI, XIII; सत्यरात्रे VII; स'रात्रेषितेन VIII.

४०२. बुद्बुदाकारो I-III, XI, XIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्द्धमासे[४०३] गोलाकारं[४०४] भवति।

arddhamāse golākāraṃ bhavati /

मासमात्रे[४०५] कठिनं[४०६] भवति।

māsamātre kathinaṃ bhavati/

मासद्वयेन[४०७] शिरो भवति।

māsadvayena śiro bhavati/

तृतीये[४०८] मासि[४०९] हस्तपादादिकं भवति।

tṛtīye māsi hasthapādādikaṃ bhavati/

चतुर्थे मासि[४१०] चक्षुःकर्णादि[४११]नासिका[४१२]मुखमेढ्र[४१३]गुदं[४१४] भवति[४१५]।

caturthe māsi cakṣuḥkarṇādi nāsikā mukhameḍhragudaṃ bhavati/

---

४०३. अर्धमासेन I-III, XI, XIII.

४०४.गोलाकारो I-III, XI, XIII

४०५.मासमात्रेण I-III, VI, XI, XIII; मासत्रये IV; पासमात्रे VIII

४०६. कठिनो I-III, XI, XIII; कटिणं IV; कठिणं V-VII, IX.

४०७. मासर्द्दये IV; मासद्वये V, VII-IX.

४०८. तृतीय IV-V, VII

४०९. मासे IV-V, VII

४१०. मासे IV

४११. ...कर्ण I-III, XI; करण IX

४१२. नाकिा II-III; नासिक IV

४१३. ...मेढ्रं I-III, VI; मुखमेंद्र IV; मुखं मेढ्रं X; मुखं मेढ्र XII

४१४. अनुपलब्ध I-III; इस के स्थान पर 'च' X, XII

४१५. यवन्ति X, XII

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमे मासि[४१६] पृष्ठोदरं[४१७] भवति[४१८]।

pañcame māsi pṛṣthodaraṃ bhavati /

षष्ठे[४१९] मासि नखकेशादिकं भवति।

ṣaṣṭhe māsi nakhakeśādikaṃ bhavati/

सप्तमे मासि[४२०] सर्वचेतनायुक्तो[४२१] भवति।

saptame māsi sarvacetanāyukto bhavati/

अष्टमे मासि[४२२] सर्वलक्षणसंयुक्तो[४२३] भवति[४२४]।

aṣṭame māsi sarvalakṣaṇasaṃyukto bhavati/

नवमे मासि[४२५] सत्यज्ञानसंयुक्तो[४२६] भवति।[४२७]

navame māsi satyajñānasaṃyukto bhavati/

---

४१६. मासे IV.

४१७. पृष्टोदरं I-III; पृष्ठोदरो V, VIII-IX; पृष्टोदरौ VI; पृष्टोदरो VII; पृष्ठोदरौ X, XII.

४१८. भवतः VI, X, XII.

४१९. षष्टे I-III, VII.

४२०. अनुपलब्ध IV-V, VII-VIII.

४२१. सर्वचेतमसंयुक्तो IV-V, VII-VIII; सर्वचेतनयुक्तो VI, IX-X, XII.

४२२. अनुपलब्ध IV-V, VII-VIII.

४२३. इस के अनन्तर जातोपि न - अधिकपाठ VIII; सर्वलक्षणयुक्तो IX; सर्वलक्षणसम्पन्नो XI.

४२४. जीवति VIII.

४२५. अनुपलब्ध IV-V, VII, VIII.

४२६. सत्यज्ञानगर्भसंयुक्तो IV-VII, IX-X, XII; सत्वज्ञानगर्भसंयुक्तो VIII.

४२७. 'दामे योनिसंस्फार्यादज्ञानी बालको भवति। नवमे सत्यज्ञानगर्भसंयुक्तो भवति' - अधिकपाठ VII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमे[४२८] मासि योनिसंस्पर्शादज्ञानी[४२९] बालको भवति ।।६८।।

daśame māsi yonisaṃsparśādajñānī bālako bhavati //68//

On the very first day, upon the union of raj and bindu the jīva assumes the kalala form i.e. slightly thick in nature that acquires the form of a bubble in seven nights (which again) within a period of fort-night assumes a circular form, that hardens within a month, within two months acquires the appearance of a head (there upon) on the third month formation of hands and feet takes place, on forth month eyes, ears nose, mouth, generative organ and anus are formed, (whereas) the formation of back and belly takes place in the fifth month. During the sixth month nails and hair get formed. It is in seventh month (jīva) gets consciousness entirely. In the eighth month it gets all the characteristics and in the ninth month experiences the reality which it gets lost owing to the contact with the sense organ and becomes an ignorant child during tenth month.

शुक्राधिक्ये[४३०] पुरुषः[४३१]। रक्ताधिक्ये[४३२] कन्यका[४३३]। समशुक्ररक्ताभ्यां[४३४] नपुंसको[४३५] भवति[४३६]।

---

४२८. दसमे I-II.

४२९. योनिसंस्यति अज्ञानी III; योनिसंस्पार्दिज्ञानी IV; योनिसंस्पार्दज्ञान VIII; योनिसंस्पंदज्ञानी IX

४३०. शुक्राअधिक्ये I-II; शुक्रा अधिके III; शुक्राधिके IV; शुक्लाधिके V, VII-IX; पुशुक्लाधिकेषु VI.

४३१. अनुपलब्ध VIII

४३२. रक्ता अधिक्ये I-III; रक्ताधिके IV, IX; रक्ताधिकं V; रक्ताधिका VI-VII; अनुपलब्ध VIII.

४३३. कन्या IV, IX-X, XII; कंन्यका VII.

४३४. शुक्ररक्ताभ्यां IV; समश्रुक्लारक्ताभ्यां V; समः शुक्लरक्ताभ्यां VI; समशुक्लरक्ताभ्यां VII-VIII; समानसुक्लरक्ताभ्यां IX.

४३५. नपूंसकः V

४३६. अनुपलब्ध I-VII, IX, XIII

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

śukrādhikye puruṣaḥ / raktādhikye kanyakā / samaśukraraktābhyāṃ napuṃsamko bhavati /

परस्परे[४३७] स्त्रीपुरूष[४३८]-चिन्ता-व्याकुलत्वादन्धः कुब्ज वामनः पङ्गु[४३९]रङ्गहीन[४४०]श्च भवति[४४१]।।६९।।

paraspare strīpurūṣa-cintā-vyākulatvārandhaḥ kubja vāmanaḥ paṅguraṅgahīnaśca bhavati //69//

Owing to the excess in śukra the male (is born), the female upon the excess of blood; impotent(is born) upon the equality of śukra and the blood. Both the male and female, by being over powered by anxiety (during the time of union), (the child born) happens to be a blind, humpback, dwarf (or) lame or without some limbs or the other.

परस्परं[४४२]रतिकालेऽङ्ग[४४३]निपीडन[४४४]करण[४४५]गुणैः शुक्रं[४४६] द्विस्त्रिर्वारं[४४७] पतति[४४८]।

---

४३७. परस्परं I-V, VII, IX, XI.

४३८. ...'योरा अधिकांग' अधिकपाठ I-II; .. 'अधिक्यंग' अधिकपाठ III; ...'यो' अधिक XI.

४३९. ...'अधिकांग' अधिकपाठ I-III, IX.

४४०. ...'हीनाश्च' V.

४४१. भवन्ति V-VII.

४४२. परस्परं I-VII, IX, XI, XIII.

४४३. अंगा IV

४४४. निपीडनं V; निपीड VI.

४४५. कारण I-III.

४४६. शुक्लस्य IV; शुक्लं V-VIII; शुक्ल IX.

४४७. द्वित्रिवारं I-III, VIII, XI; द्वित्रिवार IV; द्वित्रिर्वारं V; द्वित्रिकरं VII.

४४८. पातेन IV; पति V, VII; भवति VIII-IX.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

parasparaṃ ratikāla'ṅganipīḍanakaraṇagunaiḥ śukraṃ dvistrirvāraṃ patati/

तेन[४४९] द्वितीयो[४५०] बालको भवति।।७०।।

tena dvitīyo bālako bhavati //70//

During the period of copulation, because of the mutual excessive pressing to or against the bodily limbs, upon the ejaculation of śukra (semen) for twice /thrice (times), a second child is born.

सार्द्धपलत्रयं शुक्रं[४५१] विंशतिपलं रक्तं द्वादशपलं मेदो[४५२] दशपल[४५३] मज्जा

sārddhapalatrayaṃ śukraṃ vinśatipalaṃ raktaṃ dvādaśapalaṃ medo daśapalaṃ majjā

शतपलं मांसं दशपल[४५४] पित्तं[४५५] विंशतिपलं[४५६] श्लेष्मा[४५७] तद्वद्वातः[४५८] स्यात्[४५८]।

śatapalaṃ māmsaṃ daśapalaṃ pittaṃ vinśatipalaṃ śleṣmā tadvadvātaḥ syāt /

---

४४९. अनुपलब्ध IV

४५०. द्वितीयश्च I-III

४५१. शुक्लं V-IX

४५२. मेदं VIII

४५३. दापलो XI

४५४. अनुपलब्ध VI, X, XII

४५५. अनुपलब्ध VI, X, XII

४५६. ...पलः IV, XI; अनुपलब्ध IX

४५७. श्लेष्मं V-IX

४५८. ...तोपि IV; ...तं V-VI, IX-X, XII; तद्वाद्वातं VII; तद्वत्वात VIII

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्ट्यधिक[४५९]शतत्रय[४६०]मस्थीन्य[४६१]स्थिमात्राः[४६२] सन्धयः।
सार्द्धत्रय[४६३]कोटि[४६४]रोम[४६५]कूपाणि।

ṣaṣṭyadhika śatatrayamasthīnyasthimātrāḥ sandhayaḥ /
sārddhatrayakoṭi romakūpāṇi /

पितृमातृ[४६६]वीर्यात[४६७] वातपित्तश्लेष्मधातुत्रयसहितं[४६८] दशधातुमयं[४६९] शरीरं भवति

pitṛmātūvīryāt vātpittaśleṣmadhātutrayasahitaṃ daśadhātumayaṃ śarīraṃ bhavati

इति गर्भोलि[४७०]पिण्डोत्पत्तिः ।।७१।।

iti garbholipiṇḍotpattiḥ ||71||

The body is made up of the vīrya (semen) of the father and mother, constitutive of ten dhatus inclusive of the three - vāta,

---

४५९. अनुपलब्ध IV, VIII.
४६०. षंष्टधिक III; अनुपलब्ध IV-IX; षष्ठधिक XIII.
४६१. इसके बाद 'पल' अधिकपाठ IX.
४६२. अस्थिनी V, VII; अस्थि IX.
४६३. ....मात्रं V-X, XII.
४६४. ....त्रि VIII; अनुपलब्ध XIII.
४६५. कोटयो IV; कोटी V, VII.
४६६. रोमाणि I-III, XI, XIII.
४६६. पितुर्मातुश्च I-III, XI.
४६७. वीर्यं भवत्येव I-II, XI; वीर्यां भवत्येव III;
वीर्यं भवति V-X, XII, XIII.
४६८. अनुपलब्ध I-III, V-VII, IX, XI, XIII;
इस के स्थान पर 'तथाच' IV; सहितः VIII
४६९. तत्सर्वममं I-III; इस से पूर्व 'रसादिसमधातवो एवंच' अधिकपाठ IV.
४७०. गर्भोत्थ I-III, XI, XIII; अनुपलब्ध IX.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

pitta , śleṣma- having different constituents in the following different proportions namely- three and half palas of semen (śukra), twenty palas blood, twelve palas fat(med), the marrow ten palas, hundred palas flesh, pitta(bile) ten palas, śleṣma(phlegma) twenty palas and similarly the vāta(i.e. twenty palas) and three hundred and sixty bones and the joints are there (in the body)and three and half corers of hair - holes (pore in the skin).

Thus ends the discussion on the origin of the body of the embrio.

Note: According to traditional Indian measurement of fluids One Pala stands for 40 grams. Thus the measurement of flesh in human body amounts to 4000 grams (śatapala māṃsaṃ). This measurement can be verified scientifically. Our ancient sages without any equipment like in modern times have measured the human body.

।। इति श्री[४७१]गोरक्षनाथकृतौ[४७२] सिद्धसिद्धान्तपद्धतौ[४७३] पिण्डोत्पत्ति[४७४]नाम[४७५] प्रथमोपदेशः[४७६] ।।

//iti śri gorakṣanāthakṛtau siddhasiddhāntapaddhatau piṇḍotpatti nāma prathamopadeśaḥ //

Thus ends Chapter First named as the piṇḍotpatti (origin of the body) of siddhasiddhāntpaddhati by śrī gorakṣanāth.

---

४७१. अनुपलब्ध I I-VI, VIII-X, XII.

ata eva ye yoginaste tasyā ākuñcane ratāḥ |
asyā ākuñcanaṃ mūlādhārabandhanātsiddhaṃ syāt |
yasmāccarācaraṃ jagadidaṃ cidacidātmakaṃ prabhavati sa eva mūlādhāra saṃvitprasaraḥ prasiddhaḥ ||18||

Only that aspect of energy (kuṇḍalinī) is known as 'lower' which is full of (responsible for) sensory activities permeated with worldly thought and anxieties. Therefore those who are yogis are ever absorbed in her contraction. Her contraction is accomplished through the contraction of mūlādhāra (mulādhāra bandha). It is from which (lower energy) the movable and immovable of the nature of animate and inanimate, proceeds. That very mūlādhāra is therefore well-known for the expansion of consciousness.

उक्तञ्च[१६६] शिवानन्दाचार्यैः[१६७] -
सर्वशक्तिप्रसरसङ्कोचनाभ्यां[१६८] जगत्सृष्टिः[१६९] संहतिश्च[१७०] भवत्येव न सन्देहः[१७१] ।

---

१६६. उक्तं I-III, VI, VIII-X, XII-XIII.
१६७. शिवानंदाचार्ये III; शिवानंदाचायैः VI; शिवानदाचार्यैः VII; शिवानंदाचार्येण VIII; श्द्रंनाथेन IX.
१६८. सर्वशक्तया शक्तिप्रसरसंकोचनाभ्यां IV; सर्वशक्तयां शक्तिप्रसरसंकोचाभ्यां V-VI; सर्वशक्त्यां शक्तिप्रसदंरोचाभ्यां VIII; सर्वशक्त्या शक्तिप्रसदसंकोचनाभ्यां IX.
१६९. जगत्सृष्टि III, V, VII-IX.
१७०. संहती इति III; संहतिश्चा V, VII; संहदिश्च VIII.
१७१. संशयः IV.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मात्तां[१७२] मूलमित्युच्यते[१७३] ।[१७४]
अतः प्रायेण सर्वे[१७५] सिद्धा[१७६] मूलाधाररता[१७७] भवन्ति ।।१९।।

uktañca śivānandācāryaiḥ -
sarvaśaktiprasarasaṅkocanābhyāṃ jagatsūṣṭiḥ
saṃhūtiśca bhavatyeva na saṃdehaḥ |
tasmāttāṃ mūlamityucyate |
ataḥ prāyeṇa sarve siddhā mūlādhāraratā bhavanti ||19||

It is said by ācārya śivānanda -There is no doubt that it is through the expansion and contraction of the entire energy the creation and dissolution of universe takes place therefore she is addressed as fundamental. Therefore all the adepts get invariably absorbed in mūlādhāra.

तरङ्गितस्वभावं[१७८] जीवात्मानं[१७९] वृथा भ्रमन्तमपि स्वप्रकाशमध्ये[१८०] स्वस्वरूपतया सर्वदा[१८१] धारयितुं[१८२]

---

१७२. तस्मात् तान् VIII; तस्मात् सा XI.
१७३. मूलमित्यच्यंते IX.
१७४. अनुपलब्ध - संम्पूर्ण पंक्ति III.
१७५. सिद्धाः III; सर्व IV-X, XII.
१७६. सर्वे III.
१७७. मूलाधारता V, VIII.
१७८. तरंगितः स्वभाव V; तरंगितस्वभाव VII.
१७९. जीवात्म VIII.
१८०. प्रकाशमध्ये IV.
१८१. सदा IV-VIII, XI.
१८२. धारितुं V-IX.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समर्था[१८३] या सा[१८४] मध्याशक्तिः[१८५] कुण्डलिनी[१८६] गीयते ।
स्थूलसूक्ष्मरूपेण[१८७] महासिद्धानां[१८८] प्रतीयत[१८९] इति[१९०] निश्चयः ।।२०।।

taraṅgitasvabhāvaṃ jīvātmānaṃ vṛthā
bhramantamapi svaprakāśamadhye
svasvarūpatayā sarvadā dhārayituṃ samarthā
yā sā madhyāśaktiḥkuṇḍalinī gīyate |
sthūlasūkṣmarūpeṇa mahāsiddhānaṃ ptatīyata iti
niścayaḥ ||20||

That middle energy kuṇḍalinī, though wavering in nature and makes the individual soul wander futilely, is capable enough to establish it (soul) in its own luminous nature forever, is sung as kuṇḍalinī. Indeed (she) is intuited by the great adepts in her gross and subtle form.

---

१८३. समंथा VII.
१८४. अनुपलब्ध IV-V, VII.
१८५. मध्यशक्तिः IV, VIII.
१८६. कुंडलिनीति IV-V, VII, XI.
१८७. स्छूलसूक्ष्मरूपेण IV-V, VII, IX.
१८८. महासिद्धान्तं X, XII.
१८९. प्रत्ययत्वे IV; प्रतियत्वेति V; प्रतियत्वेत्पति VII.
१९०. अनुपलब्ध IV, VII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थूलेति[१९१-१९२]

निखिलग्राह्याधारग्राह्यस्वरूपाऽपि[१९३] पदार्थान्तरैर्भ्राम्यमाणा[१९४] चिद्रूपा[१९५] या[१९६] वर्त्तते सा[१९७] कुण्डलिनी साकारा[१९८] स्थूला[१९९] ।[२००]

पुनस्त्वियमेव[२०१] स्वप्रसारचातुर्यतया[२०२] वर्त्तमाना[२०३] योगिनां[२०४] परानन्ददायिनी[२०५] कुण्डलिनी या निश्चयभूता वर्त्तते सा सूक्ष्मा[२०६] निराकारा प्रबुद्धा[२०७] महासिद्धानां[२०८] मते प्रसिद्धा[२०९] ।।२१।।

---

१९१. स्छूलेति IV-V, VII, IX.

१९२. अनुपलब्ध - सम्पूर्ण पंक्ति XI,

१९३. निखिलग्राह्याधारस्वरूपापि III; निखिलाग्राह्याधाराग्राह्यास्वरूपापि IV-V; तिखिलग्राह्याधारग्राह्यस्वरूपापि VII; निखिलग्राह्याधारग्राह्यस्वरीपिणि VIII.

१९४. पदार्थांतरे भ्राम्यमाणा I-II, VI, VIII-IX; पदार्थांतरे भ्राम्यमाणे IV; पदार्थांतरे भ्राम्यणा V; पदार्थांतरे भ्रांम्यत्वंमाणा VII.
अनुपलब्ध - सम्पूर्ण पंक्ति XI.

१९५. संशयरूपा I; चिद्रपा II; संसयरूपा III; संविद्रूपा IV; विद्रूपा V; वद्रूपा VI; वत्रूपा VIII; इव क्षद्रूपा X, XII; इत्यपि पा - अधिक पाद्ध II.

१९६. अनुपलब्ध IV-X, XII.

१९७. अनुपलब्ध I-III.

१९८. सा साकार I-II; सा साकारा III; साकार IV-X, XII.

१९९. स्छूला IV-V, VII, IX.

२००. अनुपलब्ध - सम्पूराण पंक्ति XI.

२०१. पुनस्क्षयमेव VIII.

२०२. स्वप्रसारचतुरतया III; सारचातुर्यतया IV; प्रसारचातुर्यतया VIII.

२०३. वर्तमान III; वर्तमानी VII.

२०४. योगिनं IV-V, VII-VIII.

२०५. परमानंदतया IV-V, VII; परानंदतया VI, VIII-XII.

२०६. सूक्षा II; सूक्ष्म VIII.

२०७. प्रबुत्धा IV.

२०८. महासिद्धाना I.

२०९. प्रसिद्धाः VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sthūleti-
nikhilagrāhyādhāragrāhyasvarūpā'spi
padārthāntarairbhrāmyamāṇā cidrūpā yā
varttate sā kuṇḍalinī sākārā sthūlā |
punastviyameva svaprasāracāturyatayā varttamānā
yogināṃ parānandāyinī kuṇḍalinī yā
niścayabhūtā varttate sā sūkṣmā nirākārā
prabuddhā mahāsiddhānāṃ mate prasiddhā ||21||

Gross form - the kuṇḍalinī that is gross in form, even though in nature graspable (grāhya) is the substratum (grāhyādhāra) of entire graspable, and is the nature of consciousness pervading all the things and again, certainly this (very kuṇḍalinī) - famous among the enlightened great adepts - is subtle and formless, (and) is the bestower of absolute bliss to those yogis who live intelligently for self -realization.

तत्त्वसारे[२११] -
सृष्टिः[२१२] कुण्डलिनी ख्याता द्विधाभावगता[२१३] तु[२१४] सा[२१५] ।
एकधा[२१६] स्थूलरूपा[२१७] च लोकानां[२१८] प्रत्यगात्मिका[२१९] ।।२२।।

---

२११. तत्प्रसारे VIII,
२१२. स्त्रिषिस्तु VIII.
२१३. वृथाभागवता IV; वृथाभावगता V; वृंथाभावगता VII; त्रिधाभागवता VIII; वृद्धाभावगता IX.
२१४. त् VIII.
२१५. च VIII; या IX.
२१६. एकथा VIII; एकदा IX.
२१७. स्छूलरूपा IV-V, VII, IX.
२१८. लोकाना V.
२१९. प्रत्ययात्मिका IV. VII-IX; प्रत्यया(गा)त्मिका X, XII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

uktañca tattvasāre -
sṛṣṭiḥ kuṇḍalinī khyātādvidhābhāvagatā tu sā |
ekadhā sthūlarūpā ca lokānāṃ pratyagātmikā ||22||

And it is stated in Tattvasār too - 'Kuṇḍalinī as creating the universe' is famous .She exists in two-fold modality .In its gross modality she is experienced (even) by non-adept.

अपरा सर्वगा सूक्ष्मा[२२०] व्याप्तिव्यापकवर्जिता[२२१] ।
तस्या[२२२] भेदं न जानाति[२२३] मोहितोऽप्रत्ययेन[२२४] तु[२२५] ।।२३।।

aparā sarvagā sūkṣmā vyāptivyāpakavarjitā |
tasyā bhedaṃ na jānāti mohitoऽpratyayena tu ||23||

In her another modality she being devoid of both 'pervasion' and 'being pervaded' is all-pervasive. No one deluded by (worldly) experience can attain her secret.

---

२२०. सूक्ष्या II.

२२१. व्याप्यव्यापकवर्जिता IV, XI; व्याप्तिर्व्यापकवर्जिता VIII; व्याप्यव्यापकवर्जितो IX.

२२२. तस्य VI, VIII.

२२३. जानामि I; जानंति IV, VIII-IX.

२२४. मोहिताऽप्रत्ययेन I-II, VI-VIII; मोहिताः प्रत्ययो IV; मोहिप्रत्ययेन V; मोहितः प्रत्ययेन IX; मोहितः प्रत्ययेन X, XII-XIII.

२२५. नहि IV.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मात्सूक्ष्मा परा[२२६] संवित्स्वरूपा[२२७] मध्याशक्तिः[२२८] कुण्डलिनी योगिभिर्देहशुद्धिसिद्ध्यर्थं[२२९] सद्गुरू मुखाज्ज्ञात्वा[२३०] स्वस्वरूपदशाया प्रबोधनीया[२३१] ।।२४।।

tasmātsūkṣmā parā saṃvitsvarūpāmadyāśaktiḥ kuṇḍalinī yogibhirdehaśuddhisiddhyarthaṃ sadgurū mukhājjñātvā svasvarūpadaśāyā prabodhanīyā ||24||

Therefore one should know directly from a realized guru (teacher) about this modality of middle energy kuṇḍalinī subtle in nature (and) of the form of highest consciousness for the sake of awakening it during the state of self-realization.

अथोर्ध्वशक्तिनिपातः[२३२] कथ्यते -

सर्वेषां तत्त्वानामुपरि[२३३] वर्त्तमानत्वान्निर्नाम[२३४] परमं[२३५] पदमेवोर्ध्वमिति[२३६] प्रसिद्धम् ।

---

२२६. परात् I-III.

२२७. संवित्सरूपा IV.

२२८. मध्यशक्तिः IV; मध्यशक्तिनी VIII.

२२९. योगिभिर्देहाशुद्धिसिद्ध्यर्थं III; देहसिध्यर्थं IV; योगिडिर्देहसिध्यर्थं V-X, XII-XIII.

२३०. सद्गुरुमुखात् ज्ञात्वा IV; सद्गुरुमुखाज्ज्ञात्वा V, IX; सद्गुरुमुखाज्ञात्वा VII.

२३१. प्रवोधनीया IV; प्रबोधिनीया V.

२३२. अतोर्ध्वशक्तिनिपात II; अथ उर्ध्वशक्तिनिपातः V; अतः उर्ध्वशक्तिनिपातः VI; अतः ऊर्ध्वशक्तिर्निपातः VIII; अत ऊर्ध्वशक्तिनिपातः XI.

२३३. तत्त्वानांमुपरि VII.

२३४. वर्तमानत्वानिर्नाम VII; वर्तमानत्वान्निर्नामं VIII.

२३५. परम V-VIII, XIII.

२३६. पदं एवं ऊर्ध्वं IV; पदं एवं उर्ध्व V; पदं एव उर्ध्वं VI; पदं एवं उर्ध्व VII;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य[२३७] स्वसंवेदननानासाक्षात्कारसूचनशीला[२३८] या
सोदर्ध्वशक्तिरभिधीयते[२३९] ।
तस्या निपातनमिति[२४०] स्वस्वरूप[२४१] द्विधाभासनिराभासमात्रं[२४२]
न[२४३] स्वस्वरूपस्याऽखण्डत्वेन[२४४] ज्ञानं[२४५] भवति[२४६] ।।२५।।

athordhvaśaktinipātaḥ kathyate -
sarveṣāṃ tattvānāmupari varttamānatvānnirnāma paramaṃ padamevordhvamiti prasiddham |
tasya svasaṃvedananānāsākṣātkārasūcanaṣīlā yā sodrdhvaśaktirabhidhīyate |
tasyā nipātanamiti svasvarūpa dvidhābhāsanirābhāsamātraṃ na
svasvarūpasyāSkhaṇḍatvena jñānaṃ bhavati ||25||

Now the descent of upper energy is being stated -This modality of kundalini is well known as nameless the highest state - because it transcends the entire existents and owing to its power of self

---

२३७. तस्याः IV-VII, X-XII; तस्या VIII; स्यात् IX.
२३८. स्वसंवेदनानातानासाक्षात्कारसूचनशीला VII.
२३९. सा उर्ध्वशक्तिरभिधीयते VI; ऊर्ध्वशक्तिरभिधीयते X, XII; सा ऊर्ध्वशक्तिरित्यभिधीयते XI.
२४०. निपातनं I-III; निपातमिति V.
२४१. स्वरूप I-III.
२४२. द्विधाभासोनिराभासः IV; द्विधाभासानिराभासः V, VII; द्विधाभासनिरासः VI, X, XII; द्विविधानिरासः VIII; द्विधानिरासः IX.
२४३. किन्तु IV-X, XII; किन्तु-अधिकपाद्ध XIII.
२४४. स्वस्वरूपाभास अखंडत्वेन IV; स्वस्वरूपा अखंडत्वेन V-VII, IX-X, XII-XIII; स्वस्वरूप अखंडत्वेन VIII.
२४५. अनुपलब्ध IV-X, XII-XIII.
२४६. इति - अधिकपाठः VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

manifestation is indicative of manifold intuitions hence it is addressed as upper energy. Her descent is not just of the nature extinction of duality but also the descent is of the form of gnosis of indivisible totality of the REALITY.

उक्तञ्च[२४७] -
शिवस्याऽभ्यन्तरे[२४८] शक्तिः शक्तेरभ्यन्तरे[२४९] शिवः[२५०] ।
अन्तरं नैव[२५१] जानीयाच्चन्द्रचन्द्रिकयोरिव[२५२] ।।२६।।

uktañca -
śivasyāऽbhyantare śaktiḥ śakterabhyantare śivaḥ |
antaraṃ naiva jānīyāccandracandrikayoriva ||26||

And it is stated also - Within the śiva śakti is there and within śakti there is śiva. Like the moon and moonlight the difference cannot be made out.

अत ऊद्र्ध्वशक्तिनिपातेन[२५३] महासिद्धायोगिभिः[२५४] परमं[२५५] पदं[२५६] प्रार्यत इति सिद्धम् ।।२७।।

---

२४७. उक्तं चः II.
२४८. शिवः स्याभ्यंतरे VII.
२४९. राक्तेरभ्यंतरः I-II, IV, VI, X, XII-XIII; शक्तिरभ्यांतरे III; शक्तिरभ्यंतरः V, VII-VIII, राक्तेरभ्यांतरे IX.
२५०. शिव III.
२५१. न्नैव V.
२५२. जानियाच्चंद्रचंद्रिकयोरिव II; जानीयाच्चंद्रचद्रिकयोरिव V; जानीयात् चंद्रचंद्रिकयोरिव VIII.
२५३. ऊर्ध्वशक्तिनिपाते III; ऊर्ध्वंशक्तिनिपातेन IV-V, उर्ध्वशक्तितिनातेन VI.
२५४. महायोगिभिः III.
२५५. परम III-IV, VI, VIII-X, XII; परमानंदं V.
२५६. पद III.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ata ūdrdhvaśaktinipātena mahāsiddhāyogibhiḥ paramaṃ padaṃ prāryata iti siddham ||27||

Therefore it is well established that the highest abode is attained by great adepts through the descent of the upper energy.

उक्तञ्च -[257]
सत्त्वे[258] सत्त्वे[259] सकलरचना[260] राजते[261] संवेदिका[262] ।[263]
तत्त्वे[264] तत्त्वे[265] परममहिमा संविदेवावभाति[266] ।।२८।।[267]

uktañca -
sattve sattve sakalaracanā rājate saṃvedikā |
tattve tattve paramamahimā saṃvidevāvabhāti ||28||

And it is stated also - One single enlightening and supreme glorious (energy principle) reigns and shines forth everything nay the entire creation i.e. all that comes in to being.

---

२५७. अनुपलब्ध - सम्पूर्ण पंक्ति IV-V.
२५८. सर्वेर IV.
२५९. अनुपलब्ध IV; सत्व VI.
२६०. सककलरचना VI.
२६१. राजतेज IV; राजिता VIII; राजिते IX.
२६२. सवदेका IV.
२६३. अनुपलब्ध - सम्पूर्ण पंक्ति V.
२६४. तरत्व IV.
२६५. अनुपलब्ध IV.
२६६. संविदेवायभाति VI, संविदेभावभाति VIII.
२६७. अनुपलब्ध - सम्पूर्ण पंक्ति V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावे[२६८] भावे[२६९] बहुलतरला[२७०] लम्पटा[२७१] संविदेषां[२७२] ।
भासे[२७३] भासे[२७४] भजनचतुरा बृंहिता[२७५] संविदेव[२७६] ।।२९।।

bhāve bhāve bahulataralā lampatā saṃvideṣāṃ |
bhāse bhāse bhajanacaturā bṛṃhitā saṃvideva ||29||

This very enlightening (energy principle) - fully vibrant , covetous, dexterous in characterizing and (ever) expanding - is in all that exists and (behind) all that is manifested.

इदमुक्तं[२७७] भवति[२७८] -
परापरविमर्शरूपिणी[२७९] संविन्नानाशक्तिरूपेण निखिलपिण्डाधारत्वेन[२८०] वर्त्तत इति सिद्धान्तः[२८१] ।।३०।।

idamuktaṃ bhavati -
parāparavimarśarūpiṇī saṃvinnānāśaktirūpeṇa nikhilapiṇḍādhāratvena varttata iti siddhāntaḥ ||30||

---

२६८. अनुपलब्ध V.
२६९. अनुपलब्ध IV-V.
२७०. बहलतरला IV, VII; बहलतरलां V.
२७१. लंपट VIII.
२७२. स्संविदेषा VIII; संविदेका IX.
२७३. भावे VIII.
२७४. भावे VIII.
२७५. वृंहिता I-III; हिता IV; वृहिना V.
२७६. संविदेता VIII.
२७७. किमुक्तं IV-X, XIII; एतदुक्तं XI; विमुक्तं XII.
२७८. भवक्ति V.
२७९. परापरविमर्षरूपिणी VII.
२८०. निखिलपिंडाधारतत्वेन IX.
२८१. सिद्धसिद्धान्तः XI, XIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This has already been stated - Thus is the doctrine that such an energy exists as the substratum behind the totality of human body.

।। इति श्री गोरक्षनाथकृतौ[२८२] सिद्धसिद्धान्तपद्धतौ[२८३] पिण्डाधारो[२८४] नाम[२८५] चतुर्थोपदेशः ।।

|| iti śrī gorakṣanāthakṛtau siddhasiddhāntapaddhatou piṇḍādhāro nāma caturthopadeśaḥ||

Thus ends the Fourth Chapter entitled as Piṇḍādhāra from Siddhasiddhantapaddhati by śrī gorakṣanāth.

* * * * *

२८२. गोरक्षनाथकृतौ I-VI, VIII-IX, XI.

२८३. सिद्धंसिद्धांतपधतौ VII.

२८४. पिंडाधारं VI.

२८५. अनुपलब्ध VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमोपदेशः

Chapter - V

अथ पिण्डपदयोः समरसकरणं[१] कथ्यते -

atha piṇḍapadayoḥ samarasakaraṇaṃ kathyate -

Hereafter follows the discussion on the process of unification between piṇḍa (body -microcosm) and pada (The Absolute - macrocosm).

महासिद्धयोगी[२] पूर्वोक्तक्रमेण परपिण्डादि -
स्वपिण्डान्तं[३] ज्ञात्वा परमपदे[४] समरसं[५] कुर्यात्[६] ।।१।।

mahāsiddhayogī pūrvoktakrameṇa parapiṇḍādi -
svapiṇḍāntaṃ jñātvā paramapade samarasaṃ
kuryāt ||1||

Yogī-the great adept - after having known, right from higher body to one's own body, should unite with the Absolute as per sequence stated earlier.

परमपदमिति[७] स्वसंवेद्यमत्यन्तभासाभासकमयम्[८] ।।२।।

paramapadamiti svasaṃvedyanatyantabhāsābhāsaka-
-mayam ||2||

---

१. समरसभावः - VIII
२. महायेसिद्धयोगिभिः - I; महासिद्धयोगिभिः - II, IV -X, XII.
३. स्वपिडातं - VII
४. परमं पदे - VIII
५. समरस - III
६. कूर्यात् - X
७. परमपदं च - I-III
८. स्वसंवेद्यमत्यंताभासाभासकमयं - III, VII-VIII, X, XII;
स्वसंवेद्य अत्यंताभासाभासकमयं - IV. स्वसंवेद्य त्यंतं भासाभासकमयं - V

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The parampada (Absolute) is completely Self-luminous and of the nature that illuminates the others.

उक्तञ्च[९] तत्त्वसंहितायाम् -

यत्र बुद्धिर्मनो[१०] नास्ति तत्त्वविन्नापरा[११] कला ऊहापोहौ[१२] न कर्त्तव्यौ[१३] वाणी[१४] तत्र करोति[१५] किम्[१६] ।

वाग्मिना[१७] गुरुणा[१८] सम्यक्कथं तत्पदमीयते[१९] तस्मादुक्तं शिवेनैव स्वसंवेद्य परं[२०] पदम् ।।३।।

uktañca tattvasaṃhitāyām -

yatra buddhirmano nāsti tattvavinnāparā kalā ūhāpohau na karttavyau vāṇī tatra karoti kim |

vāgminā guruṇā samyakkathaṃtatpadamīyate tasmāduktaṃshivenaiva svasaṃvedyaṃ paraṃ padam ||3||

And it is stated in Tattvasaṃhitā too -

Where there reaches neither the intellect nor the mind, that which is

---

९. उक्तं - I-III, VI, VIII-X, XII-XIII.

१०. बुद्धिर्मनो - IV; बुद्धिमनो - V, VII

११. तत्वछिन्नापरा - III; तत्वं विन्नापरा - V, VII.

१२. ऊहापौहौ - IV, उहापोहौ - V; ऊहापोहे - VII;

१३. कर्त्तव्यो - VII, IX; कर्तव्यं - VIII

१४. वाणी - I-III, XI.

१५. कराति - V.

१६. कं - VII.

१७. वाग्मिणा - IV-VII; अनुपलब्ध -

१८. गुरुवाक्यं विना - IX.

१९. तत्पदमीर्यते - IV-VII, IX, XI; तत्वेदमीर्यते - VIII

२०. परमं - XII

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

unknowable for philosophers, that which is even beyond temporality and that about which no dialectics can be undertaken (in such a matter) what role even the speech will play there !!! how can even an eloquent teacher decipher that Absolute ; therefore it is stated by śiva himself that 'That the Absolute (parapadam) is self illumined (svasaṃvedya)'.

अत एव नानाविधविचारचातुर्यवचसां[२१] विस्मयाङ्गत्वाद्[२२] गुरुचरणकृपातत्त्वमात्रेण[२३] निरुपाधिकेन[२४] निर्णेतुं[२५] शक्यत्वात्[२६] स्वसंवेद्यमेव[२७] परमपदं[२८] प्रसिद्धमिति[२९] सिद्धान्तः ।।४।।

---

२१. नानाविधाविचारात्पर चतुर्थं च वा - IV;
नानाविधीवचार्ये चातुर्यचर्चा - V;
नानाविधविचारचातुर्यचर्चा - VI; VIII - IX;
नानाविधविचार्यर्चातुर्यचर्चा - VII;
नानाविधविचारतातुर्यवचसा - X, XII.

२२. विस्मारागं - IV; विस्मयांग - V-VII, IX; विस्फारं - VIII;
विस्मयं गत्वा - X, XII.

२३. गुरुचरणात्वात् - IV; गुरुचरणत्वात् - V, VIII;
गुरुचरणत्वात् - VI-VII, IX; गुरुचरणरतत्वात् - X, XII.

२४. निरुपाधिकत्वात् - IV, VI-VII; निरुपाधिकारत्वात् - V;
निरुपाधित्वान् - VIII; निरुपाधिकत्वात् - IX; अनुपलब्धः - X, XII.

२५. निर्णीतकत्वात् - IV; निर्णिकेत्वात् - V;
निणीतत्वात् - VI-VII, X, XII; निर्निकेतत्वात् - VIII;
निर्णश्चित्वात् - IX.

२६. अनुपलब्धः - IV-X, XII;

२७. स्वसंवेद्ययेव - V; स्वसंवेद्यं एव - VII.

२८. परमं पदं - V.

२९. प्रसिद्धं इति - VI; प्रसिद्धमेति - VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ata eva nānāvidhavicāracāturyavacasāṃ vismayāṅgatvād gurucaraṇakṛpātattva mātreṇa nirūpādhikena nirṇetuṃ śakyatvāt svasaṃvedyameva paramapadaṃ prasiddhamiti siddhāntaḥ ||4||

Therefore various speculations even though full of thoughts (regarding the parampada - the Absoulate) but being just of the nature of verbal gymnastics it is only through the grace of (lotus) feet of the preceptor it is possible to be ascertained by one self having transcended the adjuncts (and) (thus) is the well known doctrine that the Absolute (param pada) is nothing but Self-illumination

गुरुरत्र[३०] सम्यक्सन्मार्गदर्शनशीलो[३१] भवति।[३२]

सन्मार्गश्च[३३] योगमार्गः । तदितरस्तु[३४] पाषण्डमार्गः ।[३५]

---

३०. गुरुरेवात्र - IX.

३१. संम्यक्सन्मार्गदर्शनशीलो - VII, IX; सम्यक्संमार्गदर्शनशीलो - VIII.

३२. भाव्यः - IV.

३३. सन्मार्गस्तु - IV; सन्मार्गो - V-X, XII.

३४. तदितरः - IV-VII, X, XII; अनुपतब्धः - VIII; तदितरे - IX.

३५. पाखंडमार्ग - I-IV, XI; पाषांडमार्ग - V, VII; अनुपलब्धः - VIII;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुक्तमादिनाथेन[३६] -

योगमार्गेषु तन्त्रेषु[३७] दीक्षितास्तांश्च[३८] दूषकाः ।[३९]
ते हि[४०] पाषण्डिनः[४१] प्रोक्तास्तथा[४२] तैः[४३] सहवासिनः[४४] ।।५।।

gururatra samyaksanmārgadarśanaśīlo bhavati |
sanmārgaśca yogamārgaḥ |
taditarastu pāṣaṇḍamārgaḥ |
taduktamādināthena -
yogamārgeṣu tantreṣu dīkṣitāstāṃśca dūṣakāḥ |
te hi pāṣaṇḍinaḥ proktāstathā taiḥ sahavāsinaḥ ||5||

Here the preceptor is one who shows the right path. And the right path is the path of Yoga and any other (paths) are nothing but the paths of hypocrisy. It is stated by ādinātha -

And those who revile the initiated in Yoga and the Tantra are just the hypocrites and so are their companions.

---

३६. तदुक्तं शंकराचार्येण - VIII.
३७. निष्णाता - I-II; निष्णात - III.
३८. दीक्षिता - III; दीक्षितास्तं - IV; दीक्षितास्तां च - VII; दीक्षितानाञ्च - XI, XIII.
३९. ये तु दूषकाः - II -III
४०. अनुपलब्धः - IX.
४१. पाखंडिनः - I -II, IX, XI ; पाखंडिन - III; पाषांडिनः - V; डिनः - IX.
४२. प्रोक्ता तथा - V, VII.
४३. तत् - IV.
४४. सहवासकः - VIII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्मिन्[४५] दर्शिते[४६] सति तत्क्षणात्स्वसंवेद्यसाक्षात्कारः[४७]
समुत्पद्यते ततो गुरुरेवाऽत्र[४८] कारणमुच्यते ।।६।।

yasmin dārśite sati tatkṣaṇātsvasaṃvedyasākṣātkāraḥ
samutpadyate tato gururevā ऽtra kāraṇamucyate ||6||

Self illumined immediate experience takes place on the very moment the preceptor shows the path. Therefore, here, the preceptor alone is the cause.

तस्माद्गुरुकटाक्षपातात्[४९] स्वसंवेद्यतया च महासिद्धयोगिभिः[५०]।
स्वकीयं[५१] पिण्डो[५२] निरुत्थानदशानुभवेन[५३] समरसः[५४] क्रियत
इति सिद्धान्तः ।।७।।[५५]

tasmādgurukaṭākṣapātāt svasaṃvedyatayā ca
mahāsiddhayogibhiḥ |
svakīyaṃ piṇḍo nirutthānadaśānubhavena samarasaḥ
kriyat iti siddhāntaḥ ||7||

---

४५. यस्मि - VII.
४६. दर्शने - VIII
४७. तत्क्षणात् स्वसंवेद्यसाक्षात्कार - III; तत्क्षणात्स्वसंवेद्यसाक्षात्कारः -
४८. गुररेवात्र - III
४९. तस्माग्दुरुकटाक्षपातात् - VII.
५०. महायोगिभिः - VIII.
५१. स्वकीय - IV; स्वकीयं - V-X, XII-XIII;
५२. पिंड - IV-V; पिंडं - VI-V, XII-XIII.
५३. निरुत्थानानुभवेन - IV - VI, X, XII; नीरुत्छानानुभवेन - VII; निरुद्धानानुभवेन - VIII; निरुच्छानानुभवेन - IX.
५४. समरसं - IV, VI-X, XII-XIII.
५५. अनुपलब्धः - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Therefore it is the doctrine that the great adepts, in the state of arousal experience, get united one's body through self-illumination by the very grace of the preceptor.

तद्यथा[५६] निरुत्थानदशाप्राप्त्युपायस्तावत्कथ्यते[५७] -

महासिद्धयोगिनः स्वस्वरूपतयाऽनुसन्धानेन[५८] निजावेशो[५९] भवति।

निजा[६०]वेशान्निपीडितनिरुत्थानदशामहोदयः[६१] कश्चिज्जायते[६२] ।

ततः[६३] सच्चिदानन्दचमत्कारादद्भुताकार[६४] प्रकाशो जायते ।

---

५६. अनुपलब्ध - V.

५७. निरुत्थानदशाप्राभुपायस्तावत् कथ्यते - III;
निरुत्थानप्राप्त्युपायः कथ्यते - IV, VI, IX - X, XII;
प्राप्त्युपायः कथ्यते - V;
निरुत्छानप्राप्तुरुपायः कथ्यंते - VII; निरुत्थानः प्रत्युपायः कथ्यते - VIII.

५८. स्वरूपतयानुसंधानेन - III; स्वस्वरूपानुसंधानेन - IV;
स्वस्वरूपतनुसंधानेन - V, VII; स्वस्थतयानुसंधानेन - VIII.

५९. निजावेष - VII.

६०. अनुपलब्धः - V.

६१. वेशो नामनिपीडितीनरुत्थानदशामहोदय - IV;
वेशनिपीडितीनरुत्छानदशामहोदयः - VII;
वेशान्निपीडलनिरुद्धानदशान्महादय - VIII;
वेशान्निपीडतनिरुत्छानदशामहोदयः - IX.

६२. कश्चिजायते - IX.

६३. तस्मात् - VIII; अनुपलब्धः - संम्पूर्णपंक्ति - V.

६४. सच्चिदानंदचमत्कारात् भूतकरणप्रकाशप्रबोधो - IV, VII;
सच्चिदानंदचमत्कारात् भूतकरप्रबोधो - VI, IX;
सच्चिदानंदचमत्कारात् भूतकरप्रकाशात् प्रबोधो - VIII

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबोधादऽखिलमेतद्[६५] द्वैताद्वैतप्रकटतया[६६] चैतन्यभासाभासकं[६७] परात्परं[६८] परमपदमेव[६९] प्रस्फुटं[७०] भवतीति[७१] सत्यम् ।।८।।[७२]

tadyathā nirutthānadaśāprāptyupāyastāvatkathyate - mahāsiddhayoginaḥ svasvarūpatayā 'nusandhānena nijāveśo bhavati |
nijāveśānnipīḍitanirutthānadaśāmahodayaḥ kaścijjāyate |
tataḥ saccidānandacamatkārarādadbhutākāra prakāśo jāyate |
prabodhāda 'khilametad dvaitādvaitaprakaṭatayā caitanyabhāsakaṃ parātparaṃ paramapadameva prasphuṭaṃ bhavatīti satyam ||8||

Hereafter the means (procedure) for the attainment of 'the state of arousal experience' (nirutthāna daśā) is explained -

Yogī- the great adept-gests established in one's form through the investigation into one's own nature and by the transcendence of (even) 'the state of being established in one's form' there comes

---

६५. प्रबोधादखिलमेव - IV, VII-IX; प्रबोधादखिलमेत - VI; अनुपलब्धः - संम्पूर्णपंक्ति - V.
६६. द्वयाद्वयप्रकटतया - I-III, VI-VII, IX-XIII; द्वयोद्वयप्रकटतया - VIII.
६७. चैतन्याभासाभासकं - IV; चैयन्यभासाभासकं - XI.
६८. परात्पर - IV; परात् - VI, VII, IX; परापर - VIII
६९. पदमेव - IV, X, XII.
७०. अनुपलब्धः - सम्पूर्णपंक्ति - V.
७१. सिद्धं - IV, VII.
७२. अनुपलब्ध -सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

into being certain state (known as) nirutthāna (non-arousal state) only to be followed by- the glory and grace of saccidānanda's wonder - an appearance of unprecedented glorious illumination. Thereby the Self - luminous transcendental the Highest State (Abode) bursts-forth which is the illuminator of the entire duality. This is the truth.

अत एव महासिद्धयोगिभिः[७३] सम्यगुक्तगुरुप्रसादं[७४]
लब्ध्वाऽवधानबलेनैक्यं[७५] भजमानैस्तत्क्षणात्परम[७६]
-पदमेवाऽनुभूयते[७७] ।।९।।[७८]

ata eva mahāsiddhayogibhiḥ samyaguktaguruprasādaṃ
labdhvāऽvadhānabalenaikyaṃ
bhajamānaistatkṣaṇātparamapadamevāऽnubhūyate ||9||

Therefore the great adepts having accomplished the grace from the preceptor in the manner stated above experience the Highest State (Abode) instantaneously sheerly on the strength of their intensity of adoration of the unity.

---

७३. महासिद्धियोगिभिः - XII.

७४. सम्यक् गुरुप्रसादं - IV, VI, VIII; सम्यगुरुप्रसादं - VII; सम्यक्कुगुरुप्रसादं - IX; सम्यक् (उक्त) गुरुप्रसादं - X, XII; सम्यगुक्तं गुरुप्रसादं - XI; अनुपलब्धः - सम्पूर्णपंक्ति - V.

७५. लब्ध्वा अवधानवलेनैक्यं - VI; लध्बा अवधानवलेनैक्य - VII; लब्ध्वा अवदानबलेनैक्यं - V.

७६. भजमानैस्तत्क्षणात् परं - IV; भजमानैश्चतत्क्षणात् परम - VIII; भजमनैः स्तत्क्षणात्परम - IX; भजमानैस्तत्क्षणातपरमं - X, XII; अनुपलब्धः - सम्पूर्णपंक्ति - V.

७७. पदमेवानुभूयते - III; तदनुभूयते - अधिकपाठ - VIII;

७८. अनुपलब्धः - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनुभवबलेन[७९] स्वकीयं[८०] सिद्धं सम्यग् निजपिण्डं परिज्ञाय[८१] तमेव परमपदं[८२] एकीकृत्य[८३] तस्मिन् प्रत्यावृत्त्यारुढेवाभ्यन्तरे[८४] स्वपिण्डसिध्यर्थं[८५] महत्त्वमनुभूयते[८६] ।।१०।।[८७]

tadanubhavabalena svakīyaṃ siddhaṃ samyag nijapiṇḍaṃ parijñāya tameva paramapadaṃ ekīkṛtya tasmin pratyāvṛttyāruḍhevābhyantare svapiṇḍasiddhyarthaṃ mahattvamanubhūyate ||10||

Through the strength of that experience having thoroughly known and one's own body having properly accomplished (and) having united with the Highest State and after repeatedly entering such experience inwardly (the great adepts) realize the significance of perfecting one's body.

---

७९. तदनुभववलेन - VII; तदानुभवबलेन - IX.

८०. स्वकीयं - VII; स्वकीयस्वकीयं - VIII.

८१. परिज्ञात्वा - IV, VI-VII, IX-X, XII; परिज्ञत्व - VIII; ज्ञात्वा - XI, XIII; अनुपलब्ध - सम्पूर्णपंक्ति - V.

८२. परमपदम् - I-IV, VII; परमं पदम् - IX.

८३. एकीकत्य - VII.

८४. प्रत्यावृत्यारुढेबाह्याभ्यंतरे - IV; प्रत्यावृत्यारुढेवाभ्यंतरे - VII प्रीत्याप्रीत्यारुढेवाभ्यंतरे - VIII; अनुपलब्धः - सम्पूर्णपंक्ति - V

८५. स्वपिंडसिध्यर्थ - IV, VI -VII, IX.

८६. महंत्वमनुभूयते - IV; मिहत्वमनुभूयते - VI-VII; मिहतत्वमनुभूयते - IX.

८७. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निजपिण्डस्य[८८] परिज्ञानञ्च[८९] स्वस्वरूपकिरणानन्दोन्मेषमात्रं[९०] यस्योन्मेषस्य[९१] प्रत्याहरणमेव[९२] समरसकरणं भवति ।।११।।[९३]

nijapiṇḍasya parijñānañca
svasvarūpakiraṇānandonmeṣamātraṃ
yasyonmeṣasya pratyāharaṇameva
samarasakaraṇaṃ bhavati ||11||

And the experiential awareness of one's body is of the nature of, blossoming forth of, the rays of bliss of the nature of one's form and by the very transcendence of which the unification takes place.

---

८८. निजपिंडमिति - IV, VI -XII.

८९. अनुपलब्ध - IV, VI, VIII, X-XIII.

९०. स्वरूपकारणानंदोन्मेषमात्रं - IV, VI-VII, IX - XII; स्वरूपकरूणानंदोन्मेषमात्रं -VIII; अनुपलब्ध - सम्पूर्णपंक्ति - V.

९१. तस्योन्मेषस्य - IV, VII-IX.

९२. प्रत्याहणमेव - VI; प्रत्याहारणमेव - VII.

९३. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव स्वकीयं पिण्डं[९४] महारश्मिपुञ्जं[९५] स्वेनैवाऽऽकारेण[९६] प्रतीयमानं स्वाऽनुसन्धानेन स्वस्मिन्नुररीकृत्य[९७] महासिद्धयोगिनः[९८] पिण्डसिद्ध्यर्थं[९९] तिष्ठन्तीति[१००] प्रसिद्धम्[१०१] ।।१२।।[१०२]

ata eva svakīyampiṇḍaṃ mahāraśmipuñjaṃ svenaivāऽऽkāreṇa pratīyamānaṃ svāऽnusandhānena svasminnurarīkṛtya mahāsiddhayoginaḥ piṇḍasiddhyarthaṃ tiṣṭhantīti prasiddham ||12||

And , therefore, the great adepts are ardently bent upon the perfection of one's body by experiencing it in one's own self in the form of the nature of the great light through one's constant persuasion. This is well known.

---

९४. पिंड - IV, VII

९५. महारश्मिपुंज - I-II; महमस्मि इति पुनः - IV; महद्रश्मिपुंजं - VI-VIII, XIII; महद्रश्मिपुजं - IX.

९६. स्वेनैवकारणेन - VIII; अनुपलब्ध -सम्पूर्णपंक्ति - V;

९७. स्वस्मिन्नूररीक्रत्य - VII; स्वस्मिन् सुररीकृत्य - VIII.

९८. महायोगिनः - VIII; अनुपलब्ध - संपूर्णपंक्ति - V.

९९. स्वपिंडसिद्ध्यर्थं - IX; पिण्डसिध्द्यर्थे - XI.

१००. तिष्ठतीति - I-III; तिष्ठतीति - IX.

१०१. प्रसिद्ध - IV; प्रसिधं - VII

१०२. अनुपलब्ध - संम्पूर्णपंक्ति - V

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिण्डसिद्धौ[१०३] वेषः[१०४] कथ्यते[१०५] -
शङ्खमुद्राधारणञ्च केशरोमप्रधारणम्[१०६] ।[१०७]
अमरीपानममलं तथा[१०८] मर्दनमुत्कटम्[१०९] ।।१३।।[११०]

piṇḍasiddhau veṣaḥ kathyate -
śaṅkhamudrādhāraṇañca
keśaromapradhāraṇam |
amarīpānamamalaṃtathā mardanamutkaṭam ||13||

For the sake of the accomplishment of body perfection the attire is stated - To posses conch, wear in ears the rings, matt, the hair, drink the pure amari (nectar through khecarī) and the intense massage-

---

१०३. पिंडसिद्धिरेवैषा - IV; अथ पिण्डसिद्धौ - X, XII.
१०४. अनुपलब्ध - IV.
१०५. अनुपलब्ध - सम्पूर्णपंक्ति - V.
१०६. शरोमप्रसारणं - IV; केशरोमप्रसारणं - VII;
कलरोमप्रधारणं - VIII
१०७. अनुपलब्ध - सम्पूर्णपंक्ति - V.
१०८. तया - IV, VI, VIII
१०९. मर्दनमुत्तमं - IV, VI-VIII; मेलनमुत्तमं - IX
११०. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकान्तवासो दीक्षा च सन्ध्या जप[१११]ममायया ।[११२]
ज्ञानभैरवमूर्त्तेस्तु[११३] तत्पूजा च सुरादिभिः[११४] ।।१४।।[११५]

ekāntavāso dīkṣā ca sandhyā japamamāyayā |
jñānabhairavamūrtestu tatpūjā ca surādibhiḥ ||14||

Living in seclusion, initiation, prayer (morning-evening), recitation (without any expectation), meditation on the form of bhairava and the worship deities etc. -

शङ्खाध्मातं[११६] सिंहनादं[११७] कौपीनं[११८] पादुके[११९] तथा।[१२०]
अङ्गवस्त्रं बहिर्वस्त्रं कम्बलं छत्रमद्भुतम् ।।१५।।[१२१]

śaṅkhādhmātaṃ siṃhanādaṃ koupīnaṃ pāduke tathā |
aṅgavastraṃ bahirvastraṃ kambalaṃ
chatramadbhutam||15||

---

१११. अपश्च मालया - IV; जपमाश्रया - X, XII.
११२. अनुपलब्ध - सम्पूर्णपंक्ति - V.
११३. ज्ञानं भैरवमूर्त्तेस्तु - ; ज्ञानमहनाथमूर्त्तेस्तु - I.
ध्यानं भैरवमूवीर्त्तेस्तु - VII; ज्ञानभैरवमूर्तेस्तु - X;
ध्यानभैरवमूर्तेस्तु - XII.
११४. यथाविधि - XI, XIII.
११५. अनुपलब्ध - सम्पूर्णपंक्ति - V.
११६. शंखाध्मातः - III; शंखध्मानं - IV; शंखध्मातं - XI.
११७. सिहनादं - II; सिंहनादं - III; सिहंनादं - X, XII; शृंगिनादं - XI, XIII;
११८. कौपिनं - IX.
११९. पादुकं - VI, VIII-IX; पादुका - X, XII.
१२०. अनुपलब्ध - सम्पूर्णपंक्ति - V.
१२१. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Blowing of the conch and the horn, wearing loin cloth, (and) wooden sandals, upper and external garment ,as also a shawl and umbrella -

वेत्रं कमण्डलुञ्चैव[१२२] भस्मना च त्रिपुण्ड्रकम् ।[१२३]
कुर्यादेतान्प्रयत्नेन[१२४] गुरुवन्दनपूर्वकम् ।।१६।।[१२५]

vetraṃ kamaṇḍaluñcaiva bhasmanā ca tripuṇḍrakam |
kuryādetānprayatnenaguruvandanapūrvakam ||16||

Staff, a jar, and putting ashes in three-fold way (upon the fore-head); let this be executed with full of effort fully preceded by salutations to the guru -

तेषां[१२६] पिण्डसिद्धा[१२७] सत्यां[१२८] सर्वाः[१२९] ।
सिद्धयः सन्निहिता[१३०] भवन्ति ।।१७।।[१३१]

teṣāṃ piṇḍasiddhā satyāṃ sarvāḥ |
siddhayaḥ sannihitā bhavanti ||17||

---

१२२. कमंडलुश्चैव - III; कंमंडलुचैव - VI.
१२३. अनुपलब्ध - सम्पूर्णपंक्ति - V.
१२४. कुर्यादेतान्प्रयत्नेन - VI.
१२५. अनुपलब्ध - संपूर्णपंक्ति - II, V.
१२६. तु - अधिकपाठ - VIII.
१२७. पिंडसिद्धानां - VIII; पिण्डसिद्धौ - X.
१२८. सत्या - III; सत्यं - IV; वै -अधिक - VIII; अपि-अधिकपाठ - IX.
१२९. सर्व - IV, VI-X. XII.
१३०. संनिधाना - IV, VI, VIII-X, XII-XIII; संन्निधाना -VII.
१३१. अनुपलब्ध - सम्पूपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Upon the successful attainment of body perfection all the siddhis get accomplished.

उक्तञ्च -

यस्मिन्[१३३] ज्ञाते[१३४] जगत् सर्वं सिद्धं भवति लीलया।[१३५]
सिद्धयः[१३६] स्वयमायान्ति[१३७] तस्माज्ज्ञेयं[१३८] परं[१३९] पदम् ।।१८।।[१४०]

uktañca -

yasminjñāte jagat sarvaṃ siddhaṃ bhavati līlayā |
siddhayaḥ svayamāyāntitasmājjñeyaṃ paraṃ padam ||18||

And indeed it is said also - By knowing which the entire universe gets accomplished effortlessly, the siddhis come in on their own accord ; therefore one should know the Highest Abode.

---

१३२. अनुपलब्ध - V.
१३३. यस्मि - VII.
१३४. जाते - IV, VI-IX.
१३५. अनुपलब्ध - सम्पूर्णपंक्ति - V.
१३६. स्वयं - I-III, VI-IX.
१३७. स्वयं मनो याति - I-III, स्वयमनायांति - VI-IX.
१३८. तस्मात् ज्ञेयं - I-III, VI; तस्मा ज्ञेयं - VII; तस्माद्येयं - VIII; तस्माज्ज्ञेयं - IX; तस्मादृज्ञेयं - X, XII.
१३९. परमं - X, XII.
१४०. अनुपलब्ध-सम्पूर्णपंक्ति - IV-V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं पदं[१४१] न वेषेण प्राप्यते[१४२] परमार्थतः ।[१४३]
देहमूलो[१४४] हि वेषः[१४५] स्याल्लोकप्रत्ययहेतुकः[१४६] ।।१९।।[१४७]

paraṃ padaṃ na veṣeṇa prāpyate paramārthataḥ |
dehamūlo hi veṣaḥ syāllokapratyayahetukaḥ ||19||

The Highest Abode, ultimately, is not obtainable through just attire; the attire is just body based, meant merely for the identification of the individuals.

लोके निकृष्टमुत्कृष्टं[१४८] परिगृह्य[१४९] पृथक्कृतम्[१५०] ।[१५१]
तत्स्वधर्म[१५२] इति प्रोक्तो[१५३] योगमार्गो[१५४] विशेषतः ।।२०।।[१५५]

loke nikṛṣṭamutkṛṣṭaṃ parigṛhya pṛthakkṛtam |
tatsvadharma iti prokto yogamārgo viśeṣataḥ ||20||

---

१४१. पदे - IX.
१४२. प्रोच्यते - IV.
१४३. अनुपलब्ध - संपूर्णपंक्ति - V.
१४४. देहमूलं - VI-X, XII.
१४५. वेषं - VI, X, XII; वेशं - VII; वेषे - VIII.
१४६. स्यात् लोकप्रत्ययहेतुकः - I-III, XI, XIII;
स्याल्लोकप्रत्ययहेतुकं - VI-VII, X, XII;
स्यात् लोकप्रत्ययहेतुकं - VIII.
१४७. अनुपलब्ध - संपूर्णपंक्ति - V.
१४८. निकृष्टमुकृष्टं - VI; नकृष्टमुत्कृष्टं - VII; निकृष्टमुत्मृष्टं - VIII.
१४९. परिग्रह - I-II; परिगृह्यं - VII
१५०. पृथक् ततः - IV; पृथक् कृतः - VI-VII, IX; पृथक्तत्वः - VIII.
१५१. अनुपलब्ध - संपूर्णपंक्ति - V.
१५२. तत्सधर्म - IV.
१५३. प्रोक्तं - VIII.
१५४. योगमार्गे - IV, VI-X, XII.
१५५. अनुपलब्ध - संपूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In the world the conduct is distinguished on the basis of its inferiority or superiority; under superior (conduct) is svadharm (path of one's own true nature) and particularly the path of yoga is that svadharma (superior conduct).

योगमार्गात्परो मार्गो नास्ति श्रुतौ[१५६] स्मृतौ[१५७]।
शास्त्रेष्वन्येषु[१५८] सर्वेषु शिवेन कथितः[१५९] पुरा ।।२१।।[१६०]

yogamārgātparo mārgo nāsti śrutau smṛtau |
śāstreṣvanyeṣu sarveṣu śivenakathitaḥ purā ||21||

As pronounced by śiva of antiquity there is no path superior to the path of Yoga that is stated in the śruti , smṛti and (even) in all the other scriptures.

---

१५६. स्मृतौ - VIII.
१५७. अनुपलब्ध - संपूर्णपंक्ति - V.
१५८. शास्त्रेषु च पुराणेषु - IX.
१५९. कथितं - III.
१६०. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगः[१६१] सन्नहनोपायो[१६२] ज्ञानसङ्गतियुक्तिषु[१६३]।[१६४]
लोके निकृष्टं[१६५] सततं यं[१६६] वा[१६७] यं[१६८] वा[१६९] प्रकुर्वते[१७०]।[१७१]
तं[१७२] वा[१७३] तं[१७४] वा वर्जयन्ति[१७५] लोका[१७६] ज्ञानबलेन[१७७]
तु[१७८] ।।२२।।[१७९]

yogaḥ sannahanopāyo jñānasaṅgatiyuktiṣu /
loke nikṛṣṭaṃ satataṃ yaṃ vā yaṃ vā prakurvate /
taṃ vā taṃ vā varjayanti lokā jñānabalena tu //22//

---

१६१. योग - VIII.
१६२. सन्नहतोपायो - III; संहननोपायः - IV; सन्नहनोपाय - VI, IX, XI: संहननोयायः - VII; सन्नहनोपाया - VIII
१६३. ध्यानसंगतियुक्तिषु - VIII-IX;
१६४. अनुपलब्ध - संपूर्णपंक्ति - V.
१६५. निकृष्टः - IV; निकृष्ट - VII.
१६६. यो - IV, यद्यु - IX.
१६७. गो - IV; पा - VI, VIII-IX; या - VII
१६८. पा - IV; या - VI,VII; यो - VII;
१६९. यः - IV; वात् - VIII; अनुपलब्ध - IX;
१७०. प्रकीर्त्यते - IV; प्रवर्तते - VII; प्रकुर्वतो - X, XII.
१७१. अनुपलब्ध - संपूर्णपंक्ति - V.
१७२. त - IV.
१७३. मे - IV.
१७४. तां - VI-VIII; तान् - IX.
१७५. वर्जयंती - VIII; वर्जयेति - IX.
१७६. लोक - I-III, IX-XII.
१७७. ज्ञानं चलेन - VI, VIII;
१७८. च - IV.
१७९. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Yoga is an armour, is a means, is knowledge, is concordance, and is a remedy. Men, on the basis of knowledge, have always been setting aside all those things which have been judged as inferior in this world.

मनुष्याणाञ्च[१८०] सर्वेषां प्राक्संस्कारवशादिह[१८१] ।[१८२]
शास्त्रयुक्तः[१८३] समाचारः[१८४] क्रमेण भवति स्फुटः[१८५] ।।२३।।[१८६]

manuṣyāṇāñca sarveṣāṃ prāksaṃskāravaśādiha |
śāstrayuktaḥ samācāraḥ krameṇa bhavati sphutaḥ ||23||

The scriptures, reasoning and good conduct men gradually get manifested by being guided by earlier impressions here.

१८०. मनुष्याणां तु - VIII.
१८१. प्राक्संसारवशादिह - VIII.
१८२. अनुपलब्ध - V.
१८३. शास्त्रयुक्तिः - VI-VII, IX; शाक्त्रयुक्ति - VIII, X, XII.
१८४. समाचार - III.
१८५. स्फुटं - III-IV, VI, IX-XIII; स्फुदं - VII; ध्रुवं - VIII;
१८६. अनुपलब्ध - संपूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं पिण्डे[१८७] सिद्धे[१८८] ज्ञानप्राप्त्यर्थं तच्च[१८९] परमं[१९०] पदं महासिद्धानां मतं[१९१] परिज्ञाय[१९२] तस्मिन्[१९३] जीवात्मनि[१९४] चाऽहम्भावेन[१९५] सहजसंयमसोपाया[१९६]ऽद्वय[१९७] क्रमेणोपलक्ष्यते[१९८] ।।२४।।[१९९]

evaṃ piṇḍe siddhe jñānaprāptyarthaṃ tacca paramaṃ padaṃ mahāsiddhānāṃ mataṃ parijñāyatasmin jīvātmani cāऽhambhāvena sahajasaṃyamasopāyāऽdvaya--krameṇopalakṣyate ||24||

Thus having accomplished the body for the sake of attaining the knowledge - which is nothing but the Highest Abode- to be acquired from the great adepts one has to experience in oneself

---

१८७. पिंड - IV, VII-VIII.

१८८. संसिद्धौ - IV; संसिद्धे - VI-VII, IX-X, XII-XIII; संसिध्यै - VIII.

१८९. तत्व - III; ततश्च - IV.

१९०. परम - IV, VI, VIII, X, XII;

१९१. अनुपलब्ध - सम्पूर्णपंक्ति - V.

१९२. च - अधिकपाठ - VI-IX.

१९३. तस्मिञ् - XI; अहंभावं - अधिकपाठ - IV, VII, IX; अहंभावे - अधिकपाठ; - VI, X, XII; सोनाहंभावं - अधिकपाठ - VIII.

१९४. जीवात्मा - IV, VI-X, XII.

१९५. चाहंभावेन - III; च - IV, VI-X, XII.

१९६. सहजसंजमसोपायाद्वय - III; सहजसंयनोपायाद्वैत - IV; सहजसंयमसोपायाद्वैत - VI-VII, IX-X, XII-XIII; सहजसंयमनोपायाद्वैत - VIII.

१९७. अनुपलब्ध-संपूर्णपंक्ति - V.

१९८. क्रमेणोपलक्ष्यंते - IV, VI-VII; क्रमेणोपलक्ष्यति - VIII;

१९९. अनुपलब्ध - संपूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

as identical with That through the gradual sequence consisting of spontaneity, restraint, sopāya and non-duality.

तत्र सहजमिति[२००-२०१]

विश्वातीतं[२०२] परमेश्वरं[२०३] विश्वरूपेणाऽवभासमानमिति[२०४] ज्ञात्वा[२०५] एकमेवाऽस्तीति[२०६] स्वस्वभावेन यज्ज्ञानं[२०७] तत् सहजं[२०८] प्रसिद्धम् ।।२५।।[२०९]

tatra sahajamiti -

viśvātītaṃ parameśvaraṃ viśvarūpeṇāऽvabhāsamānamiti jñātvā ekamevāऽstīti svasvabhāvena yajjñānaṃ tat sahajaṃ prasiddham ||25||

---

२००. अनुपलब्ध - III.

२०१. अनुपलब्ध - सम्पूर्णपंक्ति - V.

२०२. विश्वातीत - III.

२०३. परमेश्वर - II; परमेश्वरो - III.

२०४. विश्वरूपेणावभासमान - III; विश्वस्वरूपेणावभासमानमिति - VI; विश्वरुपेण स्वयमेवावभासमानमिति - VIII; विश्वरूपेणस्वयमेवाभासमानमिति - IX; विश्वरूपेणावभासमानं - XI; विश्वरूपेणावभासमिति - XIII.

२०५. अनुपलब्ध - III-IV, VI, VIII, X, XII;

२०६. एक एवास्तीति - III; अनुपलब्ध -सम्पूर्णपंक्ति - V.

२०७. यज्ज्ञानं - I -III, VI, IX; यज्ञानं - IV, VII.

२०८. इति - अधिकपाठ - XI.

२०९. अनुपलब्ध-सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Now the spontaneity - It is well established that 'The natural knowledge that there is one and same Highest Lord that transcends the universe appearing in the form of the universe' is what is spontaneous.

संयम[२१०] इति -[२११]

सावधानानां[२१२] प्रस्फुरद्व्यापाराणां[२१३] निजवर्त्तिनां[२१४] संयमनं[२१५] कृत्वा[२१६] आत्मनि[२१७] निधीयत[२१८] इति[२१९] संयमः[२२०] ।।२६।।[२२१]

saṃyama iti -

sāvadhānānāṃ prasphuradvyāpārāṇāṃ nijavarttināṃ saṃyamanaṃ kṛtvā ātmani nidhīyata iti saṃyamaḥ ||26||

Now the 'restraint' - The 'restraint' is attentively restraining one's arousing modifications (and) reposing them in one's own self.

---

२१०. संयमम् - I-II, IV, VI-VIII, XI; संयमिति - VIII.
२११. अनुपलब्ध - सम्पूर्णपंक्ति - III, V;
२१२. सहजानां - VIII.
२१३. प्रस्फुरद्वयापाराणा - IV; प्रस्फरद्व्यापाराणां - VII.
२१४. निजवर्जितानां - IV; निजवृत्तिनां - IX; निजवृत्तीनां - X, XII.
२१५. संयमं - III
२१६. य - अधिकपाठ - I-III; अनुपलब्ध - सम्पूर्णपंक्ति - V.
२१७. हत्वा - III; आत्म - IV, VI-VII.
२१८. निधीयते - I-III, VI; धार्यत - VIII; धार्यम् - IX; धीयते - X, XII.
२१९. अनुपलब्ध - III.
२२०. तत्संयमः - III; संयमनः - VIII; संयम - IX.
२२१. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोपायमिति[२२२] -

स्वयमेव प्रकाशमयं[२२३] स्वेनैव
स्वात्मन्येकीकृत्य[२२४] यत्[२२५] सदा[२२६]
तत्त्वेन स्थातव्यं[२२७] तत्सोपायम्[२२८] ।।२७।।

sopāyamiti svayameva prakāśamayaṃ svenaiva
svātmanyekīkṛtya yat sadā tattvena sthātavyaṃ
tatsopāyam ||27||

Now the 'sopāya' -The 'sopāya' is such a knowledge by which one forever abides by oneself, full of luminosity, identified with oneself by oneself .

---

२२२. अनुपलब्ध - I-III.

२२३. स्वप्रकाशमयं - IV, VI-IX.

२२४. स्वात्मंन्येकीकृत्य - IX.

२२५. अनुपलब्ध - IV, VI-X, XII-XIII.

२२६. अनुपलब्ध - समस्तपंक्ति - V.

२२७. स्छातव्यं - IV, VII, IX.

२२८. अनुपलब्ध - IV, VI-X, XII.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वैतमिति[२२९_२३०]
अकर्त्तृतयैव[२३१] योगी[२३२] नित्यतृप्तौ[२३३]
निर्विकल्पः[२३४] यदा निरुत्थानतत्त्वेन[२३५]
तिष्ठति[२३६] तदद्वैतम्[२३७] ।।२८।।[२३८]

advaitamiti -
akarttṛtayaiva yogī nityatṛptāu nirvikalpaḥ yadā
nirutthānatattvena tiṣṭhati tadadvaitam ||28||

Now non-duality-Non-duality consists in yogi's abiding as a non-doer, ever full of contentment, devoid of imagination and always in undisturbed state.

---

२२९. अनुपलब्ध - I-III; अद्वयमिति - XI
२३०. अनुपलब्ध - समस्तपंक्ति - V.
२३१. अकर्त्रृतयैव - I-II; अकर्तृत्वतयैव - IV, VII, IX; अकृतत्वं तथैव - VIII; अकर्त्ततयैव - XIII.
२३२. योगिनो - IV; योगिनि - VII.
२३३. नित्यतृप्ताः - IV.
२३४. निर्विकल्पाः - IV.
२३५. निरुत्थानत्त्वेन - IV; निरुत्थानत्वेन - VI, X , XII; निरुछानत्वेन - VII; निरुद्धानत्वेन - VIII; निरुत्छानत्वेन - IX; अनुपलब्ध - सम्पूर्णपंक्ति - V.
२३६. यत्तिष्टति - I; यतिष्ठति - II; यत्तिष्ठति - III, XI; तिष्ठंति - IV; तिष्टति - VII.
२३७. तदद्वयं - I-III; अनुपलब्ध - IV, VI-X, XII; तदद्वयमिति - XI.
२३८. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्तञ्च -[२३९]

सहजं[२४०] स्वात्मसंवित्तिः[२४१] संयमः[२४२] स्वात्मनिग्रहः[२४३] ।[२४४]
सोपायं[२४५] स्वस्य[२४६] विश्रान्तिरद्वैतं[२४७] परमं[२४८] पदम् ।।२९।।[२४९]

uktañca -

sahajaṃ svātmasaṃvittiḥ saṃyamaḥ svātmanigrahaḥ |
sopāyaṃ svasya viśrāntiradvaitaṃ paramaṃ padam ||29||

And it has been stated also-Spontaneity is self knowledge; restraint is self control; sopāya is repose in one's self and non-duality the Highest Abode.

---

२३९. अनुपलब्ध - सम्पूर्णपंक्ति - V.
२४०. सहजा - IV, VII.
२४१. स्वात्मनिसंपत्तिः - VIII.
२४२. संयमं - III.
२४३. स्वस्वनिग्रहः - IV, VI-VII, IX; स्वस्वनिग्रह - VIII.
२४४. अनुपलब्ध - सम्पूर्णपंक्ति - V.
२४५. सोपायः - IV, VI-X, XII.
२४६. स्वस्व - III-IV, VI - IX; स्वात्म - XI.
२४७. विश्रांतिरद्वैतं - VII; विश्रांतः अद्वैतं - VIII.
२४८. परम - VIII.
२४९. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तज्ज्ञेयं[२५०] सद्गुरोर्वक्त्रान्नाऽन्यथा[२५१] शास्त्रकोटिभिः[२५२] ।[२५३]
न[२५४] तर्कशब्दविज्ञानान्नाचाराद्वेदपाठनात्[२५५] ।।३०।।[२५६]

tajjñeyaṃ sadgurorvaktrānnāऽnyathā śāstrakoṭibhiḥ |
na tarkaśabdavijñānānnācārādvedapaṭhanāt ||30||

It should be known from the mouth of adept teacher (and) not by any other (means at all) such as host of scriptures nor through the logic and reasoning and much less by grammar, conduct and reading of the Veda.

---

२५०. तज्ज्ञेयं - I-III, VI; तज्ञेयं - VII-IX.

२५१. सद्गुरोवक्त्रानान्यथा - III; सद्गुरोर्वत्क्रात् नान्यथा - IV;
सद्गुरोर्वक्रांतरात् नान्यथा - VIII.

२५२. शास्त्रकौटिभिः - VII.

२५३. अनुपलब्ध - संपूर्णपंक्ति - V.

२५४. नैव - IV.

२५५. तर्कसन्दविज्ञानान्नाचाराद्वेदपाठनात् - I-II;
तछब्दविज्ञानान्न च वेदस्य पाठणात् - IV;
तर्कशब्दविज्ञान्नांचाराद्वेदपाठनात् - IX,
तर्कशब्द विज्ञानान्नाचारा द्वेदपाठनात् - X-XII.

२५६. अनुपलब्ध - सम्पूर्णपंक्ति - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तश्रवणान्नैव[२५७] तत्त्वमस्यादिबोधनात्[२५८] ।[२५९]
न[२६०] हंसोच्चारणाज्जीव[२६१]ब्रह्मणोरैक्यभावनात्[२६२] ।[२६३]
न ध्यानान्न[२६४] जपाल्लीनः[२६५] सर्वज्ञः[२६६] सिद्धिपारगः[२६७] ।।३१।।[२६८]

vedāntaśravaṇānnevatattvamasyādibodhanāt |
na haṃsoccāraṇājjīvabrahmaṇoraikyabhāvanāt |
na dhyānānna japāllīnaḥ sarvajñaḥ siddhipāragaḥ ||31||

Nor even by understanding 'That thou Art' through the listening to vedānt ; not even by the recitation of 'haṃ sa' nor by meditating upon the unity of individual soul and absolute soul ; nor by dhyāna nor by dissolution, observance of silence, recitation, neither by libation.

---

२५७. वेदांतश्रवणेनैव - IV, VI-IX.

२५८. तत्तमस्यादिबोधनात् - III.

२५९. अनुपलब्ध - V.

२६०. ना - VIII.

२६१. हंसोच्चारणात्बीज - VII; हंसोच्चारणाज्जीवः - VIII.

२६२. ब्राह्मणोरैक्यभावनात् - IX; ब्रह्मणोरक्यभावनात् - XII.

२६३. अनुपलब्ध - संपूर्णपंक्ति - V.

२६४. ध्यान्ये - VII.

२६५. जपाल्लीन - III; तयाल्लीनान्
(मौनकर्म समाश्रयात् लीनेपिण्डभवेद्योगी अधिकपाठः) - IV;
तयाल्लीनः - VI, X, XII;
न्नल्लपालीनान् (मौनकर्म समाश्रयात् लीने पिंडेभवेद्योगी - अधिकपाठः) - VII,
लयोन्मौनाज् - XIII; लयालीनेपिंडे भवेद्योगी अधिकपाठः) - VIII.

२६६. जपात् - XIII.

२६७. सिद्धिपारगः - III; स्वेच्छपारगः - VII; सिद्धपारगः - VIII;
सन्तर्पणादपि - XIII.

२६८. अनुपलब्धः - V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्थो[२६९] योगी स्वयं कर्त्ता[२७०] लीलया चाजरामराः[२७१] ।
अवध्यो[२७२] देवदैत्यानां क्रीडते[२७३] भैरवो यथा ।।३२।।[२७४]

svastho yogī svayaṃ karttā līlayā cājarāmarāḥ |
avadhyo devadaityānāṃ krīḍate bhairavo yathā ||32||

The yogī is established in one's own self, is an agent (sherely playfully); is free from old age and death; is never killed by either by gods or demons, sports like bhairava.

इत्येवं निश्चलो[२७५] यासौ[२७६] क्रमादाप्नोति[२७७] लीलया ।
सिद्धीरसाध्याः[२७८] सर्वाश्च[२७९] सत्यमीश्वरभाषितम्[२८०] ।।३३।।[२८१]

---

२६९. स्वेच्छा - IV; स्वच्छो - VI; स्वेछा - VII, VIII; स्वयं - IX; स्वेच्छो - X, XII, XIII;

२७०. कर्ता - IV, XI.

